vidura nIti

વિદુર નીતિ

Document Information

Text title : vidura niiti

File name : viduraniti.itx

Category : major_works, vyAsa

Location : doc_z_misc_major_works

Author : Maharshi Vyasa

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Adhyaya 33 prajaagaraparva (udyogaparva) of Mahaabhaarata

Latest update : December 18, 1999

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

sanskritdocuments.org

vidura nIti

વિદુર નીતિ

Vidura Niti has been extracted from પ્રજાગરપર્વ (ઉદ્યોગપર્વ) of મહાભારત.

અધ્યાયઃ 33

વૈશમ્પાયન ઉવાચ ।

દ્વાઃસ્થં પ્રાહ મહાપ્રાજ્ઞો ધૃતરાષ્ટ્રો મહીપતિઃ ।
વિદુરં દ્રષ્ટુમિચ્છામિ તમિહાનય માચિરમ્ ॥ ૧॥

પ્રહિતો ધૃતરાષ્ટ્રેણ દૂતઃ ક્ષત્તારમબ્રવીત્ ।
ઈશ્વરસ્ત્વાં મહારાજો મહાપ્રાજ્ઞ દિદૃક્ષતિ ॥ ૨॥

એવમુક્તસ્તુ વિદુરઃ પ્રાપ્ય રાજનિવેશનમ્ ।
અબ્રવીદ્ધૃતરાષ્ટ્રાય દ્વાઃસ્થ માં પ્રતિવેદય ॥ ૩॥

દ્વાઃસ્થ ઉવાચ ।
વિદુરોઽયમનુપ્રાપ્તો રાજેન્દ્ર તવ શાસનાત્ ।
દ્રષ્ટુમિચ્છતિ તે પાદૌ કિં કરોતુ પ્રશાધિ મામ્ ॥ ૪॥

ધૃતરાષ્ટ્ર ઉવાચ ।
પ્રવેશય મહાપ્રાજ્ઞં વિદુરં દીર્ઘદર્શિનમ્ ।
અહં હિ વિદુરસ્યાસ્ય નાકાલ્યો જાતુ દર્શને ॥ ૫॥

દ્વાઃસ્થ ઉવાચ ।
પ્રવિશાન્તઃ પુરં ક્ષત્તર્મહારાજસ્ય ધીમતઃ ।
ન હિ તે દર્શનેઽકાલ્યો જાતુ રાજા બ્રવીતિ મામ્ ॥ ૬॥

વૈશમ્પાયન ઉવાચ ।
તતઃ પ્રવિશ્ય વિદુરો ધૃતરાષ્ટ્ર નિવેશનમ્ ।

અબ્રવીત્પ્રાઞ્જલિર્વાક્યં ચિન્તયાનં નરાધિપમ્ ॥ ૭॥

વિદુરોઽહં મહાપ્રાજ્ઞ સમ્પ્રાપ્તસ્તવ શાસનાત્ ।
યદિ કિં ચન કર્તવ્યમયમસ્મિ પ્રશાધિ મામ્ ॥ ૮॥

ધૃતરષ્ત્ર ઉવાચ ।
સઞ્જયો વિદુર પ્રાપ્તો ગર્હયિત્વા ચ માં ગતઃ ।
અજાતશત્રોઃ શ્વો વાક્યં સભામધ્યે સ વક્ષ્યતિ ॥ ૯॥

તસ્યાદ્ય કુરુવીરસ્ય ન વિજ્ઞાતં વચો મયા ।
તન્મે દહતિ ગાત્રાણિ તદકાર્ષીત્પ્રજાગરમ્ ॥ ૧૦॥

જાગ્રતો દહ્યમાનસ્ય શ્રેયો યદિહ પશ્યસિ ।
તદ્બ્રૂહિ ત્વં હિ નસ્તાત ધર્માર્થકુશલો હ્યસિ ॥ ૧૧॥

યતઃ પ્રાપ્તઃ સઞ્જયઃ પાણ્ડવેભ્યો
ન મે યથાવન્મનસઃ પ્રશાન્તિઃ ।
સર્વેન્દ્રિયાણ્યપ્રકૃતિં ગતાનિ
કિં વક્ષ્યતીત્યેવ હિ મેઽદ્ય ચિન્તા ॥ ૧૨॥

તન્મે બ્રૂહિ વિદુર ત્વં યથાવન્
મનીષિતં સર્વમજાતશત્રોઃ ।
યથા ચ નસ્તાત હિતં ભવેચ્ચ
પ્રજાશ્ચ સર્વાઃ સુખિતા ભવેયુઃ ॥- ॥

વિદુર ઉવાચ ।
અભિયુક્તં બલવતા દુર્બલં હીનસાધનમ્ ।
હૃતસ્વં કામિનં ચોરમાવિશન્તિ પ્રજાગરાઃ ॥ ૧૩॥

કચ્ચિદેતૈર્મહાદોષૈર્ન સ્પૃષ્ટોઽસિ નરાધિપ ।
કચ્ચિન્ન પરવિત્તેષુ ગૃધ્યન્વિપરિતપ્યસે ॥ ૧૪॥

ધૃતરાષ્ટ્ર ઉવાચ ।
શ્રોતુમિચ્છામિ તે ધર્મ્યં પરં નૈઃશ્રેયસં વચઃ ।
અસ્મિન્રાજર્ષિવંશે હિ ત્વમેકઃ પ્રાજ્ઞસમ્મતઃ ॥ ૧૫॥

વિદુર ઉવાચ ।
રજા લક્ષણસમ્પન્નસ્ત્રૈલોક્યસ્યાધિપો ભવેત્ ।
પ્રેષ્યસ્તે પ્રેષિતશ્ચૈવ ધૃતરાષ્ટ્ર યુધિષ્ઠિરઃ ॥- ॥

વિપરીતતરશ્ચ ત્વં ભાગધેયે ન સમ્મતઃ ।
અર્ચિષાં પ્રક્ષયાચ્ચૈવ ધર્માત્મા ધર્મકોવિદઃ ॥- ॥

આનૃશંસ્યાદનુક્રોશાદ્ધર્માત્સત્યાત્પરાક્રમાત્ ।
ગુરુત્વાત્ત્વયિ સમ્પ્રેક્ષ્ય બહૂન્ક્લેષાંસ્તિતિક્ષતે ॥- ॥

દુર્યોધને સૌબલે ચ કર્ણે દુઃશાસને તથા ।
એતેષ્વૈશ્વર્યમાધાય કથં ત્વં ભૂતિમિચ્છસિ ॥- ॥

એકસ્માત્વૃક્ષાદ્યજ્ઞપત્રાણિ રાજન્
સ્રુક્ચ દ્રૌણી પેઠનીપીડને ચ ।
એતસ્માદ્રાજન્બ્રુવતો મે નિબોધ
એકસ્માદ્વૈ જાયતેઽસચ્ચ સચ્ચ ॥- ॥

આત્મજ્ઞાનં સમારમ્ભસ્તિતિક્ષા ધર્મનિત્યતા ।
યમર્થાન્નાપકર્ષન્તિ સ વૈ પણ્ડિત ઉચ્યતે ॥- ॥

નિષેવતે પ્રશસ્તાનિ નિન્દિતાનિ ન સેવતે ।
અનાસ્તિકઃ શ્રદ્દધાન એતત્પણ્ડિત લક્ષણમ્ ॥ ૧૬॥

ક્રોધો હર્ષશ્ચ દર્પશ્ચ હ્રીસ્તમ્ભો માન્યમાનિતા ।
યમર્થાન્નાપકર્ષન્તિ સ વૈ પણ્ડિત ઉચ્યતે ॥ ૧૭॥

યસ્ય કૃત્યં ન જાનન્તિ મન્ત્રં વા મન્ત્રિતં પરે ।
કૃતમેવાસ્ય જાનન્તિ સ વૈ પણ્ડિત ઉચ્યતે ॥ ૧૮॥

યસ્ય કૃત્યં ન વિઘ્નન્તિ શીતમુષ્ણં ભયં રતિઃ ।
સમૃદ્ધિરસમૃદ્ધિર્વા સ વૈ પણ્ડિત ઉચ્યતે ॥ ૧૯॥

યસ્ય સંસારિણી પ્રજ્ઞા ધર્માર્થાવનુવર્તતે ।
કામાદર્થં વૃણીતે યઃ સ વૈ પણ્ડિત ઉચ્યતે ॥ ૨૦॥

યથાશક્તિ ચિકીર્ષન્તિ યથાશક્તિ ચ કુર્વતે ।
ન કિં ચિદવમન્યન્તે પણ્ડિતા ભરતર્ષભ ॥ ૨૧॥

ક્ષિપ્રં વિજાનાતિ ચિરં શ‌ૃણોતિ
વિજ્ઞાય ચાર્થં ભજતે ન કામાત્ ।
નાસમ્પૃષ્ટો વ્યૌપયુઙ્ક્તે પરાર્થે

તત્પ્રજ્ઞાનં પ્રથમં પણ્ડિતસ્ય ॥ ૨૨॥

નાપ્રાપ્યમભિવાઞ્છન્તિ નષ્ટં નેચ્છન્તિ શોચિતુમ્ ।
આપત્સુ ચ ન મુહ્યન્તિ નરાઃ પણ્ડિત બુદ્ધયઃ ॥ ૨૩॥

નિશ્ચિત્ય યઃ પ્રક્રમતે નાન્તર્વસતિ કર્મણઃ ।
અવન્ધ્ય કાલો વશ્યાત્મા સ વૈ પણ્ડિત ઉચ્યતે ॥ ૨૪॥

આર્ય કર્મણિ રાજ્યન્તે ભૂતિકર્માણિ કુર્વતે ।
હિતં ચ નાભ્યસૂયન્તિ પણ્ડિતા ભરતર્ષભ ॥ ૨૫॥

ન હૃષ્યત્યાત્મસમ્માને નાવમાનેન તપ્યતે ।
ગાઙ્ગો હ્રદ ઇવાક્ષોભ્યો યઃ સ પણ્ડિત ઉચ્યતે ॥ ૨૬॥

તત્ત્વજ્ઞઃ સર્વભૂતાનાં યોગજ્ઞઃ સર્વકર્મણામ્ ।
ઉપાયજ્ઞો મનુષ્યાણાં નરઃ પણ્ડિત ઉચ્યતે ॥ ૨૭॥

પ્રવૃત્ત વાક્ચિત્રકથ ઊહવાન્પ્રતિભાનવાન્ ।
આશુ ગ્રન્થસ્ય વક્તા ચ સ વૈ પણ્ડિત ઉચ્યતે ॥ ૨૮॥

શ્રુતં પ્રજ્ઞાનુગં યસ્ય પ્રજ્ઞા ચૈવ શ્રુતાનુગા ।
અસમ્ભિન્નાર્ય મર્યાદઃ પણ્ડિતાખ્યાં લભેત સઃ ॥ ૨૯॥

અર્થં મહાન્તમાસદ્ય વિદ્યામૈશ્વર્યમેવ ચ ।
વિચરત્યસમુન્નદ્ધો યસ્ય પણ્ડિત ઉચ્યતે ॥- ॥

અશ્રુતશ્ચ સમુન્નદ્ધો દરિદ્રશ્ચ મહામનાઃ ।
અર્થાંશ્ચાકર્મણા પ્રેપ્સુર્મૂઢ ઇત્યુચ્યતે બુધૈઃ ॥ ૩૦॥

સ્વમર્થં યઃ પરિત્યજ્ય પરાર્થમનુતિષ્ઠતિ ।
મિથ્યા ચરતિ મિત્રાર્થે યશ્ચ મૂઢઃ સ ઉચ્યતે ॥ ૩૧॥

અકામાં કામયતિ યઃ કામયાનાં પરિત્યજેત્ ।
બલવન્તં ચ યો દ્વેષ્ટિ તમાહુર્મૂઢચેતસમ્ ॥- ॥

અકામાન્કામયતિ યઃ કામયાનાન્પરિદ્વિષન્ ।
બલવન્તં ચ યો દ્વેષ્ટિ તમાહુર્મૂઢચેતસમ્ ॥ ૩૨॥

અમિત્રં કુરુતે મિત્રં મિત્રં દ્વેષ્ટિ હિનસ્તિ ચ ।
કર્મ ચારભતે દુષ્ટં તમાહુર્મૂઢચેતસમ્ ॥ ૩૩॥

સંસારયતિ કૃત્યાનિ સર્વત્ર વિચિકિત્સતે ।
ચિરં કરોતિ ક્ષિપ્રાર્થે સ મૂઢો ભરતર્ષભ ॥ ૩૪॥

શ્રાદ્ધં પિતૃભ્યો ન દદાતિ દૈવતાનિ નાર્ચતિ ।
સુહૃન્મિત્રં ન લભતે તમાહુર્મૂઢચેતસમ્ ॥- ॥

અનાહૂતઃ પ્રવિશતિ અપૃષ્ટો બહુ ભાષતે ।
વિશ્વસત્યપ્રમત્તેષુ મૂઢ ચેતા નરાધમઃ ॥ ૩૫॥

પરં ક્ષિપતિ દોષેણ વર્તમાનઃ સ્વયં તથા ।
યશ્ચ ક્રુધ્યત્યનીશઃ સન્સ ચ મૂઢતમો નરઃ ॥ ૩૬॥

આત્મનો બલમાજ્ઞાય ધર્માર્થપરિવર્જિતમ્ ।
અલભ્યમિચ્છન્નૈષ્કર્મ્યાન્મૂઢ બુદ્ધિરિહોચ્યતે ॥ ૩૭॥

અશિષ્યં શાસ્તિ યો રાજન્યશ્ચ શૂન્યમુપાસતે ।
કદર્યં ભજતે યશ્ચ તમાહુર્મૂઢચેતસમ્ ॥ ૩૮॥

અર્થં મહાન્તમાસાદ્ય વિદ્યામૈશ્વર્યમેવ વા ।
વિચરત્યસમુન્નદ્ધો યઃ સ પણ્ડિત ઉચ્યતે ॥ ૩૯॥

એકઃ સમ્પન્નમશ્નાતિ વસ્તે વાસશ્ચ શોભનમ્ ।
યોઽસંવિભજ્ય ભૃત્યેભ્યઃ કો નૃશંસતરસ્તતઃ ॥ ૪૦॥

એકઃ પાપાનિ કુરુતે ફલં ભુઙ્ક્તે મહાજનઃ ।
ભોક્તારો વિપ્રમુચ્યન્તે કર્તા દોષેણ લિપ્યતે ॥ ૪૧॥

એકં હન્યાન્ન વા હન્યાદિષુર્મુક્તો ધનુષ્મતા ।
બુદ્ધિર્બુદ્ધિમતોત્સૃષ્ટા હન્યાદ્રાષ્ટ્રં સરાજકમ્ ॥ ૪૨॥

એકયા દ્વે વિનિશ્ચિત્ય ત્રીંશ્ચતુર્ભિર્વશે કુરુ ।
પઞ્ચ જિત્વા વિદિત્વા ષટ્સપ્ત હિત્વા સુખી ભવ ॥ ૪૩॥

એકં વિષરસો હન્તિ શસ્ત્રેણૈકશ્ચ વધ્યતે ।
સરાષ્ટ્રં સ પ્રજં હન્તિ રાજાનં મન્ત્રવિસ્રવઃ ॥ ૪૪॥

એકઃ સ્વાદુ ન ભુઞ્જીત એકશ્ચાર્થાન્ન ચિન્તયેત્ ।
એકો ન ગચ્છેદધ્વાનં નૈકઃ સુપ્તેષુ જાગૃયાત્ ॥ ૪૫॥

એકમેવાદ્વિતીયં તદ્યદ્રાજન્નાવબુધ્યસે ।
સત્યં સ્વર્ગસ્ય સોપાનં પારાવારસ્ય નૌરિવ ॥ ૪૬॥

એકઃ ક્ષમાવતાં દોષો દ્વિતીયો નોપલભ્યતે ।
યદેનં ક્ષમયા યુક્તમશક્તં મન્યતે જનઃ ॥ ૪૭॥

સોઽસ્ય દોષો ન મન્તવ્યઃ ક્ષમા હિ પરમં બલમ્ ।
ક્ષમા ગુણો હ્યશક્તાનાં શક્તાનાં ભૂષણં તથા ॥- ॥

ક્ષમા વશીકૃતિર્લોકે ક્ષમયા કિં ન સાધ્યતે ।
શાન્તિશઙ્ખઃ કરે યસ્ય કિં કરિષ્યતિ દુર્જનઃ ॥- ॥

અતૃણે પતિતો વહ્નિઃ સ્વયમેવોપશામ્યતિ ।
અક્ષમાવાન્પરં દોષૈરાત્માનં ચૈવ યોજયેત્ ॥- ॥

એકો ધર્મઃ પરં શ્રેયઃ ક્ષમૈકા શાન્તિરુત્તમા ।
વિદ્યૈકા પરમા દૃષ્ટિરહિંસૈકા સુખાવહા ॥ ૪૮॥

દ્વાવિમૌ ગ્રસતે ભૂમિઃ સર્પો બિલશયાનિવ ।
રાજાનં ચાવિરોદ્ધારં બ્રાહ્મણં ચાપ્રવાસિનમ્ ॥ ૪૯॥

દ્વે કર્મણી નરઃ કુર્વન્નસ્મિઁલ્લોકે વિરોચતે ।
અબ્રુવન્પરુષં કિં ચિદસતો નાર્થયંસ્તથા ॥ ૫૦॥

દ્વાવિમૌ પુરુષવ્યાઘ્ર પરપ્રત્યય કારિણૌ ।
સ્ત્રિયઃ કામિત કામિન્યો લોકઃ પૂજિત પૂજકઃ ॥ ૫૧॥

દ્વાવિમૌ કણ્ટકૌ તીક્ષ્ણૌ શરીરપરિશોષણૌ ।
યશ્ચાધનઃ કામયતે યશ્ચ કુપ્યત્યનીશ્વરઃ ॥ ૫૨॥

દ્વાવેવ ન વિરાજેતે વિપરીતેન કર્મણા ।
ગૃહસ્થશ્ચ નિરારમ્ભઃ કાર્યવાંશ્ચૈવ ભિક્ષુકઃ ॥- ॥

દ્વાવિમૌ પુરુષૌ રાજન્સ્વર્ગસ્ય પરિ તિષ્ઠતઃ ।
પ્રભુશ્ચ ક્ષમયા યુક્તો દરિદ્રશ્ચ પ્રદાનવાન્ ॥ ૫૩॥

ન્યાયાગતસ્ય દ્રવ્યસ્ય બોદ્ધવ્યૌ દ્વાવતિક્રમૌ ।
અપાત્રે પ્રતિપત્તિશ્ચ પાત્રે ચાપ્રતિપાદનમ્ ॥ ૫૪॥

દ્વાવમ્ભસિ નિવેષ્ટવ્યૌ ગલે બદ્ધ્વા દૃઢં શિલામ્ ।
ધનવન્તમદાતારં દરિદ્રં ચાતપસ્વિનમ્ ॥- ॥

દ્વાવિમૌ પુરુષવ્યાઘ્ર સૂર્યમણ્ડલભેદિનૌ ।

પરિવ્રાડ્યોગયુક્તશ્ચ રણે ચાભિમુખો હતઃ ॥- ॥

ત્રયો ન્યાયા મનુષ્યાણાં શ્રૂયન્તે ભરતર્ષભ ।
કનીયાન્મધ્યમઃ શ્રેષ્ઠ ઇતિ વેદવિદો વિદુઃ ॥ ૫૫॥

ત્રિવિધાઃ પુરુષા રાજન્નુત્તમાધમમધ્યમાઃ ।
નિયોજયેદ્યથાવત્તાંસ્ત્રિવિધેષ્વેવ કર્મસુ ॥ ૫૬॥

ત્રય એવાધના રાજન્ભાર્યા દાસસ્તથા સુતઃ ।
યત્તે સમધિગચ્છન્તિ યસ્ય તે તસ્ય તદ્ધનમ્ ॥ ૫૭॥

હરણં ચ પરસ્વાનાં પરદારાભિમર્શનમ્ ।
સુહૃદશ્ચ પરિત્યાગસ્ત્રયો દોષા ક્ષયાવહઃ ॥- ॥

ત્રિવિધં નરકસ્યેદં દ્વારં નાશનમાત્મનઃ ।
કામઃ ક્રોધસ્તથા લોભસ્તસ્માદેતત્ત્રયં ત્યજેત્ ॥- ॥

વરપ્રદાનં રાજ્યાં ચ પુત્રજન્મ ચ ભારત ।
શત્રોશ્ચ મોક્ષણં કૃચ્છ્રાત્ત્રીણિ ચૈકં ચ તત્સમમ્ ॥- ॥

ભક્તં ચ બજમાનં ચ તવાસ્મીતિ વાદિનમ્ ।
ત્રીનેતાન્ શરણં પ્રાપ્તાન્વિષમેઽપિ ન સન્ત્યજેત્ ॥- ॥

ચત્વારિ રાજ્ઞા તુ મહાબલેન
વર્જ્યાન્યાહુઃ પણ્ડિતસ્તાનિ વિદ્યાત્ ।
અલ્પપ્રજ્ઞૈઃ સહ મન્ત્રં ન કુર્યાન્
ન દીર્ઘસૂત્રૈરલસૈશ્ચારણૈશ્ચ ॥ ૫૮॥

ચત્વારિ તે તાત ગૃહે વસન્તુ
શ્રિયાભિજુષ્ટસ્ય ગૃહસ્થ ધર્મે ।
વૃદ્ધો જ્ઞાતિરવસન્નઃ કુલીનઃ
સખા દરિદ્રો ભગિની ચાનપત્યા ॥ ૫૯॥

ચત્વાર્યાહ મહારાજ સદ્યસ્કાનિ બૃહસ્પતિઃ ।
પૃચ્છતે ત્રિદશેન્દ્રાય તાનીમાનિ નિબોધ મે ॥ ૬૦॥

દેવતાનાં ચ સઙ્કલ્પમનુભાવં ચ ધીમતામ્ ।
વિનયં કૃતવિદ્યાનાં વિનાશં પાપકર્મણામ્ ॥ ૬૧॥

ચત્વારિ કર્માણ્યભયઙ્કરાણિ

ભયં પ્રયચ્છન્ત્યયથાકૃતાનિ ।
માનાગ્નિહોત્રં ઉત માનમૌનં
 માનેનાધીતમુત માનયજ્ઞઃ ॥ - ॥

પઞ્ચાગ્નયો મનુષ્યેણ પરિચર્યાઃ પ્રયત્નતઃ ।
પિતા માતાગ્નિરાત્મા ચ ગુરુશ્ચ ભરતર્ષભ ॥ ૬૨ ॥

પઞ્ચૈવ પૂજયઁલ્લોકે યશઃ પ્રાપ્નોતિ કેવલમ્ ।
દેવાન્પિતૄન્મનુષ્યાંશ્ચ ભિક્ષૂનતિથિપઞ્ચમાન્ ॥ ૬૩ ॥

પઞ્ચ ત્વાનુગમિષ્યન્તિ યત્ર યત્ર ગમિષ્યસિ ।
મિત્રાણ્યમિત્રા મધ્યસ્થા ઉપજીવ્યોપજીવિનઃ ॥ ૬૪ ॥

પઞ્ચેન્દ્રિયસ્ય મર્ત્યસ્ય છિદ્રં ચેદેકમિન્દ્રિયમ્ ।
તતોઽસ્ય સ્રવતિ પ્રજ્ઞા દૃતેઃ પાદાદિવોદકમ્ ॥ ૬૫ ॥

ષડ્દોષાઃ પુરુષેણેહ હાતવ્યા ભૂતિમિચ્છતા ।
નિદ્રા તન્દ્રી ભયં ક્રોધ આલસ્યં દીર્ઘસૂત્રતા ॥ ૬૬ ॥

ષડિમાન્પુરુષો જહ્યાદ્ભિન્નાં નાવમિવાર્ણવે ।
અપ્રવક્તારમાચાર્યમનધીયાનમૃત્વિજમ્ ॥ ૬૭ ॥

અરક્ષિતારં રાજાનં ભાર્યાં ચાપ્રિય વાદિનીમ્ ।
ગ્રામકારં ચ ગોપાલં વનકામં ચ નાપિતમ્ ॥ ૬૮ ॥

ષડેવ તુ ગુણાઃ પુંસા ન હાતવ્યાઃ કદાચન ।
સત્યં દાનમનાલસ્યમનસૂયા ક્ષમા ધૃતિઃ ॥ ૬૯ ॥

અર્થાગમો નિત્યમરોગિતા ચ
પ્રિયા ચ ભાર્યા પ્રિયવાદિની ચ ।
વશ્યશ્ચ પુત્રોઽર્થકરી ચ વિદ્યા
ષટ્ જીવલોકસ્ય સુખાનિ રાજન્ ॥ - ॥

ષણ્ણામાત્મનિ નિત્યાનામૈશ્વર્યં યોઽધિગચ્છતિ ।
ન સ પાપૈઃ કુતોઽનર્થૈર્યુજ્યતે વિજિતેન્દ્રિયઃ ॥ ૭૦ ॥

ષડિમે ષટ્સુ જીવન્તિ સપ્તમો નોપલભ્યતે ।
ચોરાઃ પ્રમત્તે જીવન્તિ વ્યાધિતેષુ ચિકિત્સકાઃ ॥ ૭૧ ॥

પ્રમદાઃ કામયાનેષુ યજમાનેષુ યાજકાઃ ।

રાજા વિવદમાનેષુ નિત્યં મૂર્ખેષુ પણ્ડિતાઃ ॥ ૭૨॥

ષડિમાનિ વિનશ્યન્તિ મુહૂર્તમનવેક્ષણાત્ ।
ગાવઃ સેવા કૃષિર્ભાર્યા વિદ્યા વૃષલસંગતિઃ ॥- ॥

ષડેતે હ્યવમન્યન્તે નિત્યં પૂર્વોપકારિણમ્ ।
આચાર્યં શિક્ષિતા શિષ્યાઃ કૃતદારશ્ચ માતરમ્ ॥- ॥

નારિં વિગતકામસ્તુ કૃતાર્થાશ્ચ પ્રયોજકમ્ ।
નાવં નિસ્તીર્ણકાન્તારા નાતુરાશ્ચ ચિકિત્સકમ્ ॥- ॥

આરોગ્યમાનૃણ્યમવિપ્રવાસઃ
સદ્‌ભિર્મનુષ્યૈઃ સહ સમ્પ્રયોગઃ ।
સ્વપ્રત્યયા વૃત્તિરભીતવાસઃ
ષટ્ જીવલોકસ્ય સુખાનિ રાજન્ ॥- ॥

ઈર્ષ્યુર્ઘૃણી નસન્તુષ્ટઃ ક્રોધનો નિત્યશઙ્કિતઃ ।
પરભાગ્યોપજીવી ચ ષડેતે નિત્યદુઃખિતાઃ ॥- ॥

સપ્ત દોષાઃ સદા રાજ્ઞા હાતવ્યા વ્યસનોદયાઃ ।
પ્રાયશો યૈર્વિનશ્યન્તિ કૃતમૂલાશ્ચ પાર્થિવાઃ ॥ ૭૩॥

સ્ત્રિયોઽક્ષા મૃગયા પાનં વાક્પારુષ્યં ચ પઞ્ચમમ્ ।
મહચ્ચ દણ્ડપારુષ્યમર્થદૂષણમેવ ચ ॥ ૭૪॥

અષ્ટૌ પૂર્વનિમિત્તાનિ નરસ્ય વિનશિષ્યતઃ ।
બ્રાહ્મણાન્પ્રથમં દ્વેષ્ટિ બ્રાહ્મણૈશ્ચ વિરુધ્યતે ॥ ૭૫॥

બ્રાહ્મણ સ્વાનિ ચાદત્તે બ્રાહ્મણાંશ્ચ જિઘાંસતિ ।
રમતે નિન્દયા ચૈષાં પ્રશંસાં નાભિનન્દતિ ॥ ૭૬॥

નૈતાન્સ્મરતિ કૃત્યેષુ યાચિતશ્ચાભ્યસૂયતિ ।
એતાન્દોષાન્નરઃ પ્રાજ્ઞો બુદ્‌ધ્યા બુદ્‌ધ્વા વિવર્જયેત્ ॥ ૭૭॥

અષ્ટાવિમાનિ હર્ષસ્ય નવ નીતાનિ ભારત ।
વર્તમાનાનિ દૃશ્યન્તે તાન્યેવ સુસુખાન્યપિ ॥ ૭૮॥

સમાગમશ્ચ સખિભિર્મહાંશ્ચૈવ ધનાગમઃ ।
પુત્રેણ ચ પરિષ્વઙ્ગઃ સન્નિપાતશ્ચ મૈથુને ॥ ૭૯॥

સમયે ચ પ્રિયાલાપઃ સ્વયૂથેષુ ચ સન્નતિઃ ।

અભિપ્રેતસ્ય લાભશ્ચ પૂજા ચ જનસંસદિ ॥ ૮૦॥

અષ્ટૌ ગુણાઃ પુરુષં દીપયન્તિ
પ્રજ્ઞા ચ કૌલ્યં ચ દમઃ શ્રુતં ચ ।
પરાક્રમશ્ચાબહુભાષિતા ચ
દાનં યથાશક્તિ કૃતજ્ઞતા ચ ॥- ॥

નવદ્વારમિદં વેશ્મ ત્રિસ્થૂણં પઞ્ચ સાક્ષિકમ્ ।
ક્ષેત્રજ્ઞાધિષ્ઠિતં વિદ્વાન્યો વેદ સ પરઃ કવિઃ ॥ ૮૧॥

દશ ધર્મં ન જાનન્તિ ધૃતરાષ્ટ્ર નિબોધ તાન્ ।
મત્તઃ પ્રમત્ત ઉન્મત્તઃ શ્રાન્તઃ ક્રુદ્ધો બુભુક્ષિતઃ ॥ ૮૨॥

ત્વરમાણશ્ચ ભીરુશ્ચ લુબ્ધઃ કામી ચ તે દશ ।
તસ્માદેતેષુ ભાવેષુ ન પ્રસજ્જેત પણ્ડિતઃ ॥ ૮૩॥

અત્રૈવોદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
પુત્રાર્થમસુરેન્દ્રેણ ગીતં ચૈવ સુધન્વના ॥ ૮૪॥

યઃ કામમન્યૂ પ્રજહાતિ રાજા
પાત્રે પ્રતિષ્ઠાપયતે ધનં ચ ।
વિશેષવિચ્છ્રુતવાન્ક્ષિપ્રકારી
તં સર્વલોકઃ કુરુતે પ્રમાણમ્ ॥ ૮૫॥

જાનાતિ વિશ્વાસયિતું મનુષ્યાન્
વિજ્ઞાત દોષેષુ દધાતિ દણ્ડમ્ ।
જાનાતિ માત્રાં ચ તથા ક્ષમાં ચ
તં તાદૃશં શ્રીર્જુષતે સમગ્રા ॥ ૮૬॥

સુદુર્બલં નાવજાનાતિ કંચિદ્-
યુક્તો રિપું સેવતે બુદ્ધિપૂર્વમ્ ।
ન વિગ્રહં રોચયતે બલસ્થૈઃ
કાલે ચ યો વિક્રમતે સ ધીરઃ ॥ ૮૭॥

પ્રાપ્યાપદં ન વ્યથતે કદા ચિદ્
ઉદ્યોગમન્વિચ્છતિ ચાપ્રમત્તઃ ।
દુઃખં ચ કાલે સહતે જિતાત્મા
ધુરન્ધરસ્તસ્ય જિતાઃ સપત્નાઃ ॥ ૮૮॥

અનર્થકં વિપ્ર વાસં ગૃહેભ્યઃ
પાપૈઃ સન્ધિં પરદારાભિમર્શમ્ ।
દમ્ભં સ્તૈન્યં પૈશુનં મદ્ય પાનં
ન સેવતે યઃ સ સુખી સદૈવ ॥ ૮૯॥

ન સંરમ્ભેણારભતેઽર્થવર્ગમ્
આકારિતઃ શંસતિ તથ્યમેવ ।
ન માત્રાર્થે રોચયતે વિવાદં
નાપૂજિતઃ કુપ્યતિ ચાપ્યમૂઢઃ ॥ ૯૦॥

ન યોઽભ્યસૂયત્યનુકમ્પતે ચ
ન દુર્બલઃ પ્રાતિભાવ્યં કરોતિ ।
નાત્યાહ કિં ચિત્ક્ષમતે વિવાદં
સર્વત્ર તાદૃગ્લભતે પ્રશંસામ્ ॥ ૯૧॥

યો નોદ્ધતં કુરુતે જાતુ વેષં
ન પૌરુષેણાપિ વિકત્થતેઽન્યાન્ ।
ન મૂર્ચ્છિતઃ કટુકાન્યાહ કિં ચિત્
પ્રિયં સદા તં કુરુતે જનોઽપિ ॥ ૯૨॥

ન વૈરમુદ્દીપયતિ પ્રશાન્તં
ન દર્મમારોહતિ નાસ્તમેતિ ।
ન દુર્ગતોઽસ્મીતિ કરોતિ મન્યું
તમાર્ય શીલં પરમાહુરગ્ર્યમ્ ॥ ૯૩॥

ન સ્વે સુખે વૈ કુરુતે પ્રહર્ષં
નાન્યસ્ય દુઃખે ભવતિ પ્રતીતઃ ।
દત્ત્વા ન પશ્ચાત્કુરુતેઽનુતાપં
ન કત્થતે સત્પુરુષાર્ય શીલઃ ॥ ૯૪॥

દેશાચારાન્સમયાઞ્જાતિધર્માન્
બુભૂષતે યસ્તુ પરાવરજ્ઞઃ ।
સ તત્ર તત્રાધિગતઃ સદૈવ
મહાજનસ્યાધિપત્યં કરોતિ ॥ ૯૫॥

દમ્ભં મોહં મત્સરં પાપકૃત્યં
રાજદ્વિષ્ટં પૈશુનં પૂગવૈરમ્ ।

મત્તોન્મત્તૈર્દુર્જનૈશ્ચાપિ વાદં
યઃ પ્રજ્ઞાવાન્વર્જયેત્સ પ્રધાનઃ ॥ ૯૬॥

દમં શૌચં દૈવતં મઙ્ગલાનિ
પ્રાયશ્ચિત્તં વિવિધાઁલ્લોકવાદાન્ ।
એતાનિ યઃ કુરુતે નૈત્યકાનિ
તસ્યોત્થાનં દેવતા રાધયન્તિ ॥ ૯૭॥

સમૈર્વિવાહં કુરુતે ન હીનૈઃ
સમૈઃ સખ્યં વ્યવહારં કથાશ્ચ ।
ગુણૈર્વિશિષ્ટાંશ્ચ પુરો દધાતિ
વિપશ્ચિતસ્તસ્ય નયાઃ સુનીતાઃ ॥ ૯૮॥

મિતં ભુઙ્ક્તે સંવિભજ્યાશ્રિતેભ્યો
મિતં સ્વપિત્યમિતં કર્મકૃત્વા ।
દદાત્યમિત્રેષ્વપિ યાચિતઃ સં-
સ્તમાત્મવન્તં પ્રજહાત્યનર્થાઃ ॥ ૯૯॥

ચિકીર્ષિતં વિપ્રકૃતં ચ યસ્ય
નાન્યે જનાઃ કર્મ જાનન્તિ કિં ચિત્ ।
મન્ત્રે ગુપ્તે સમ્યગનુષ્ઠિતે ચ
સ્વલ્પો નાસ્ય વ્યથતે કશ્ચિદર્થઃ ॥ ૧૦૦॥

યઃ સર્વભૂતપ્રશમે નિવિષ્ટઃ
સત્યો મૃદુર્દાનકૃચ્છુદ્ધ ભાવઃ ।
અતીવ સઞ્જ્ઞાયતે જ્ઞાતિમધ્યે
મહામણિર્જાત્ય ઇવ પ્રસન્નઃ ॥ ૧૦૧॥

ય આત્મનાપત્રપતે ભૃશં નરઃ
સ સર્વલોકસ્ય ગુરુર્ભવત્યુત ।
અનન્ત તેજાઃ સુમનાઃ સમાહિતઃ
સ્વતેજસા સૂર્ય ઇવાવભાસતે ॥ ૧૦૨॥

વને જાતાઃ શાપદગ્ધસ્ય રાજ્ઞઃ
પાણ્ડોઃ પુત્રાઃ પઞ્ચ પઞ્ચેન્દ્ર કલ્પાઃ ।
ત્વયૈવ બાલા વર્ધિતાઃ શિક્ષિતાશ્ચ
તવાદેશં પાલયન્ત્યામ્બિકેય ॥ ૧૦૩॥

પ્રદાયૈષામુચિતં તાત રાજ્યં
સુખી પુત્રૈઃ સહિતો મોદમાનઃ ।
ન દેવાનાં નાપિ ચ માનુષાણાં
ભવિષ્યસિ ત્વં તર્કણીયો નરેન્દ્ર ॥ ૧૦૪॥

॥ ઇતિ શ્રીમહાભારતે ઉદ્યોગપર્વણિ પ્રજાગરપર્વણિ
વિદુરનીતિવાક્યે ત્રયસ્ત્રંશોऽધ્યાયઃ ॥ ૩૩॥

અધ્યાયઃ ૩૪

ધૃતરાષ્ટ્ર ઉવાચ ।
જાગ્રતો દહ્યમાનસ્ય યત્કાર્યમનુપશ્યસિ ।
તદ્બ્રૂહિ ત્વં હિ નસ્તાત ધર્માર્થકુશલઃ શુચિઃ ॥ ૧॥

ત્વં માં યથાવદ્વિદુર પ્રશાધિ
પ્રજ્ઞા પૂર્વં સર્વમજાતશત્રોઃ ।
યન્મન્યસે પથ્યમદીનસત્ત્વ
શ્રેયઃ કરં બ્રૂહિ તદ્વૈ કુરૂણામ્ ॥ ૨॥

પાપાશઙ્ગી પાપમેવ નૌપશ્યન્
પૃચ્છામિ ત્વાં વ્યાકુલેનાત્મનાહમ્ ।
કવે તન્મે બ્રૂહિ સર્વં યથાવન્
મનીષિતં સર્વમજાતશત્રોઃ ॥ ૩॥

વિદુર ઉવાચ ।
શુભં વા યદિ વા પાપં દ્વેષ્યં વા યદિ વા પ્રિયમ્ ।
અપૃષ્ટસ્તસ્ય તદ્બ્રૂયાદ્યસ્ય નેચ્છેત્પરાભવમ્ ॥ ૪॥

તસ્માદ્વક્ષ્યામિ તે રાજન્ભવમિચ્છન્કુરૂન્પ્રતિ ।
વચઃ શ્રેયઃ કરં ધર્મ્યં બ્રુવતસ્તન્નિબોધ મે ॥ ૫॥

મિથ્યોપેતાનિ કર્માણિ સિધ્યેયુર્યાનિ ભારત ।
અનુપાય પ્રયુક્તાનિ મા સ્મ તેષુ મનઃ કૃથાઃ ॥ ૬॥

તથૈવ યોગવિહિતં ન સિધ્યેત્કર્મ યન્નૃપ ।
ઉપાયયુક્તં મેધાવી ન તત્ર ગ્લપયેન્મનઃ ॥ ૭॥

અનુબન્ધાનવેક્ષેત સાનુબન્ધેષુ કર્મસુ ।
સમ્પ્રધાર્ય ચ કુર્વીત ન વેગેન સમાચરેત્ ॥ ૮॥

અનુબન્ધં ચ સમ્પ્રેક્ષ્ય વિપાકાંશ્ચૈવ કર્મણામ્ ।
ઉત્થાનમાત્મનશ્ચૈવ ધીરઃ કુર્વીત વા ન વા ॥ ૯॥

યઃ પ્રમાણં ન જાનાતિ સ્થાને વૃદ્ધૌ તથા ક્ષયે ।
કોશે જનપદે દણ્ડે ન સ રાજ્યાવતિષ્ઠતે ॥ ૧૦॥

યસ્ત્વેતાનિ પ્રમાણાનિ યથોક્તાન્યનુપશ્યતિ ।
યુક્તો ધર્માર્થયોર્જ્ઞાને સ રાજ્યમધિગચ્છતિ ॥ ૧૧॥

ન રાજ્યં પ્રાપ્તમિત્યેવ વર્તિતવ્યમસામ્પ્રતમ્ ।
શ્રિયં હ્યવિનયો હન્તિ જરા રૂપમિવોત્તમમ્ ॥ ૧૨॥

ભક્ષ્યોત્તમ પ્રતિચ્છન્નં મત્સ્યો બડિશમાયસમ્ ।
રૂપાભિપાતી ગ્રસતે નાનુબન્ધમવેક્ષતે ॥ ૧૩॥

યચ્છક્યં ગ્રસિતું ગ્રસ્યં ગ્રસ્તં પરિણમેચ્ચ યત્ ।
હિતં ચ પરિણામે યત્તદદ્યં ભૂતિમિચ્છતા ॥ ૧૪॥

વનસ્પતેરપક્વાનિ ફલાનિ પ્રચિનોતિ યઃ ।
સ નાપ્નોતિ રસં તેભ્યો બીજં ચાસ્ય વિનશ્યતિ ॥ ૧૫॥

યસ્તુ પક્વમુપાદત્તે કાલે પરિણતં ફલમ્ ।
ફલાદ્રસં સ લભતે બીજાચ્ચૈવ ફલં પુનઃ ॥ ૧૬॥

યથા મધુ સમાદત્તે રક્ષન્પુષ્પાણિ ષટ્પદઃ ।
તદ્વદર્થાન્મનુષ્યેભ્ય આદદ્યાદવિહિંસયા ॥ ૧૭॥

પુષ્પં પુષ્પં વિચિન્વીત મૂલચ્છેદં ન કારયેત્ ।
માલાકાર ઇવારામે ન યથાઙ્ગારકારકઃ ॥ ૧૮॥

કિં નુ મે સ્યાદિદં કૃત્વા કિં નુ મે સ્યાદકુર્વતઃ ।
ઇતિ કર્માણિ સઞ્ચિન્ત્ય કુર્યાદ્વા પુરુષો ન વા ॥ ૧૯॥

અનારભ્યા ભવન્ત્યર્થાઃ કે ચિન્નિત્યં તથાગતાઃ ।
કૃતઃ પુરુષકારોઽપિ ભવેદ્યેષુ નિરર્થકઃ ॥ ૨૦॥

કાંશ્ચિદર્થાન્નરઃ પ્રાજ્ઞો લભુ મૂલાન્મહાફલાન્ ।

ક્ષિપ્રમારભતે કર્તું ન વિઘ્નયતિ તાદૃશાન્ ॥ ૨૧॥

ઋજુ પશ્યતિ યઃ સર્વં ચક્ષુષાનુપિબન્નિવ ।
આસીનમપિ તૂષ્ણીકમનુરજ્યન્તિ તં પ્રજાઃ ॥ ૨૨॥

ચક્ષુષા મનસા વાચા કર્મણા ચ ચતુર્વિધમ્ ।
પ્રસાદયતિ લોકં યસ્તં લોકોઽનુપ્રસીદતિ ॥ ૨૩॥

યસ્માત્ત્રસ્યન્તિ ભૂતાનિ મૃગવ્યાધાન્મૃગા ઇવ ।
સાગરાન્તામપિ મહીં લબ્ધ્વા સ પરિહીયતે ॥ ૨૪॥

પિતૃપૈતામહં રાજ્યં પ્રાપ્તવાન્સ્વેન તેજસા ।
વાયુરભ્રમિવાસાદ્ય ભ્રંશયત્યનયે સ્થિતઃ ॥ ૨૫॥

ધર્મમાચરતો રાજ્ઞઃ સદ્ભિશ્ચરિતમાદિતઃ ।
વસુધા વસુસમ્પૂર્ણા વર્ધતે ભૂતિવર્ધની ॥ ૨૬॥

અથ સન્ત્યજતો ધર્મમધર્મં ચાનુતિષ્ઠતઃ ।
પ્રતિસંવેષ્ટતે ભૂમિરગ્નૌ ચર્માહિતં યથા ॥ ૨૭॥

ય એવ યત્નઃ ક્રિયતે પ્રર રાષ્ટ્રાવમર્દને ।
સ એવ યત્નઃ કર્તવ્યઃ સ્વરાષ્ટ્ર પરિપાલને ॥ ૨૮॥

ધર્મેણ રાજ્યં વિન્દેત ધર્મેણ પરિપાલયેત્ ।
ધર્મમૂલાં શ્રિયં પ્રાપ્ય ન જહાતિ ન હીયતે ॥ ૨૯॥

અપ્યુન્મત્તાત્પ્રલપતો બાલાચ્ચ પરિસર્પતઃ ।
સર્વતઃ સારમાદદ્યાદશ્મભ્ય ઇવ કાઞ્ચનમ્ ॥ ૩૦॥

સુવ્યાહૃતાનિ સુધિયાં સુકૃતાનિ તતસ્તતઃ ।
સઞ્ચિન્વન્ધીર આસીત શિલા હારી શિલં યથા ॥ ૩૧॥

ગન્ધેન ગાવઃ પશ્યન્તિ વેદૈઃ પશ્યન્તિ બ્રાહ્મણાઃ ।
ચારૈઃ પશ્યન્તિ રાજાનશ્ચક્ષુર્ભ્યામિતરે જનાઃ ॥ ૩૨॥

ભૂયાંસં લભતે ક્લેશં યા ગૌર્ભવતિ દુર્દુહા ।
અથ યા સુદુહા રાજન્નૈવ તાં વિનયન્ત્યપિ ॥ ૩૩॥

યદતપ્તં પ્રણમતિ ન તત્સન્તાપયન્ત્યપિ ।
યચ્ચ સ્વયં નતં દારુ ન તત્સન્નામયન્ત્યપિ ॥ ૩૪॥

એતયોપમયા ધીરઃ સન્નમેત બલીયસે ।
ઇન્દ્રાય સ પ્રણમતે નમતે યો બલીયસે ॥ ૩૫॥

પર્જન્યનાથાઃ પશવો રાજાનો મિત્ર બાન્ધવાઃ ।
પતયો બાન્ધવાઃ સ્ત્રીણાં બ્રાહ્મણા વેદ બાન્ધવાઃ ॥ ૩૬॥

સત્યેન રક્ષ્યતે ધર્મો વિદ્યા યોગેન રક્ષ્યતે ।
મૃજયા રક્ષ્યતે રૂપં કુલં વૃત્તેન રક્ષ્યતે ॥ ૩૭॥

માનેન રક્ષ્યતે ધાન્યમશ્વાન્રક્ષ્યત્યનુક્રમઃ ।
અભીક્ષ્ણદર્શનાદ્ગાવઃ સ્ત્રિયો રક્ષ્યાઃ કુચેલતઃ ॥ ૩૮॥

ન કુલં વૃત્તિ હીનસ્ય પ્રમાણમિતિ મે મતિઃ ।
અન્ત્યેષ્વપિ હિ જાતાનાં વૃત્તમેવ વિશિષ્યતે ॥ ૩૯॥

ય ઈર્ષ્યુઃ પરવિત્તેષુ રૂપે વીર્યે કુલાન્વયે ।
સુખે સૌભાગ્યસત્કારે તસ્ય વ્યાધિરનન્તકઃ ॥ ૪૦॥

અકાર્ય કરણાદ્ભીતઃ કાર્યાણાં ચ વિવર્જનાત્ ।
અકાલે મન્ત્રભેદાચ્ચ યેન માદ્યેન્ન તત્પિબેત્ ॥ ૪૧॥

વિદ્યામદો ધનમદસ્તૃતીયોઽભિજનો મદઃ ।
એતે મદાવલિપ્તાનામેત એવ સતાં દમાઃ ॥ ૪૨॥

અસન્તોઽભ્યર્થિતાઃ સદ્ભિઃ કિં ચિત્કાર્યં કદા ચન ।
મન્યન્તે સન્તમાત્માનમસન્તમપિ વિશ્રુતમ્ ॥ ૪૩॥

ગતિરાત્મવતાં સન્તઃ સન્ત એવ સતાં ગતિઃ ।
અસતાં ચ ગતિઃ સન્તો ન ત્વસન્તઃ સતાં ગતિઃ ॥ ૪૪॥

જિતા સભા વસ્ત્રવતા સમાશા ગોમતા જિતા ।
અધ્વા જિતો યાનવતા સર્વં શીલવતા જિતમ્ ॥ ૪૫॥

શીલં પ્રધાનં પુરુષે તદ્યસ્યેહ પ્રણશ્યતિ ।
ન તસ્ય જીવિતેનાર્થો ન ધનેન ન બન્ધુભિઃ ॥ ૪૬॥

આઢ્યાનાં માંસપરમં મધ્યાનાં ગોરસોત્તરમ્ ।
લવણોત્તરં દરિદ્રાણાં ભોજનં ભરતર્ષભ ॥ ૪૭॥

સમ્પન્નતરમેવાન્નં દરિદ્રા ભુઞ્જતે સદા ।
ક્ષુત્સ્વાદુતાં જનયતિ સા ચાઢ્યેષુ સુદુર્લભા ॥ ૪૮॥

પ્રાયેણ શ્રીમતાં લોકે ભોક્તું શક્તિર્ન વિદ્યતે ।
દરિદ્રાણાં તુ રાજેન્દ્ર અપિ કાષ્ઠં હિ જીર્યતે ॥ ૪૯॥

અવૃત્તિર્ભયમન્ત્યાનાં મધ્યાનાં મરણાદ્ભયમ્ ।
ઉત્તમાનાં તુ મર્ત્યાનામવમાનાત્પરં ભયમ્ ॥ ૫૦॥

ઐશ્વર્યમદપાપિષ્ઠા મદાઃ પાનમદાદયઃ ।
ઐશ્વર્યમદમત્તો હિ નાપતિત્વા વિબુધ્યતે ॥ ૫૧॥

ઇન્દ્રિયૈરિન્દ્રિયાર્થેષુ વર્તમાનૈરનિગ્રહૈઃ ।
તૈરયં તાપ્યતે લોકો નક્ષત્રાણિ ગ્રહૈરિવ ॥ ૫૨॥

યો જિતઃ પઞ્ચવર્ગેણ સહજેનાત્મ કર્શિના ।
આપદસ્તસ્ય વર્ધન્તે શુક્લપક્ષ ઇવોડુરાડ્ ॥ ૫૩॥

અવિજિત્ય ય આત્માનમમાત્યાન્વિજિગીષતે ।
અમિત્રાન્વાજિતામાત્યઃ સોઽવશઃ પરિહીયતે ॥ ૫૪॥

આત્માનમેવ પ્રથમં દેશરૂપેણ યો જયેત્ ।
તતોઽમાત્યાનમિત્રાંશ્ચ ન મોઘં વિજિગીષતે ॥ ૫૫॥

વશ્યેન્દ્રિયં જિતામાત્યં ધૃતદણ્ડં વિકારિષુ ।
પરીક્ષ્ય કારિણં ધીરમત્યન્તં શ્રીર્નિષેવતે ॥ ૫૬॥

રથઃ શરીરં પુરુષસ્ય રાજન્
નાત્મા નિયન્તેન્દ્રિયાણ્યસ્ય ચાશ્વાઃ ।
તૈરપ્રમત્તઃ કુશલઃ સદશ્વૈર્
દાન્તૈઃ સુખં યાતિ રથીવ ધીરઃ ॥ ૫૭॥

એતાન્યનિગૃહીતાનિ વ્યાપાદયિતુમપ્યલમ્ ।
અવિધેયા ઇવાદાન્તા હયાઃ પથિ કુસારથિમ્ ॥ ૫૮॥

અનર્થમર્થતઃ પશ્યન્નર્તં ચૈવાપ્યનર્થતઃ ।
ઇન્દ્રિયૈઃ પ્રસૃતો બાલઃ સુદુઃખં મન્યતે સુખમ્ ॥ ૫૯॥

ધર્માર્થૌ યઃ પરિત્યજ્ય સ્યાદિન્દ્રિયવશાનુગઃ ।
શ્રીપ્રાણધનદારેભ્ય ક્ષિપ્રં સ પરિહીયતે ॥ ૬૦॥

અર્થાનામીશ્વરો યઃ સ્યાદિન્દ્રિયાણામનીશ્વરઃ ।

ઇન્દ્રિયાણામનૈશ્વર્યાદૈશ્વર્યાદ્ભ્રશ્યતે હિ સઃ ॥ ૬૧॥

આત્મનાત્માનમન્વિચ્છેન્મનો બુદ્ધીન્દ્રિયૈર્યતૈઃ ।
આત્મૈવ હ્યાત્મનો બન્ધુરાત્મૈવ રિપુરાત્મનઃ ॥ ૬૨॥

ક્ષુદ્રાક્ષેણેવ જાલેન ઝષાવપિહિતાવુભૌ ।
કામશ્ચ રાજન્ક્રોધશ્ચ તૌ પ્રાજ્ઞાનં વિલુમ્પતઃ ॥ ૬૩॥

સમવેક્ષ્યેહ ધર્માર્થૌ સમ્ભારાન્યોઽધિગચ્છતિ ।
સ વૈ સમ્ભૃત સમ્ભારઃ સતતં સુખમેધતે ॥ ૬૪॥

યઃ પઞ્ચાભ્યન્તરાઞ્શત્રૂનવિજિત્ય મતિક્ષયાન્ ।
જિગીષતિ રિપૂનન્યાન્રિપવોઽભિભવન્તિ તમ્ ॥ ૬૫॥

દૃશ્યન્તે હિ દુરાત્માનો વધ્યમાનાઃ સ્વકર્મ ભિઃ ।
ઇન્દ્રિયાણામનીશત્વાદ્રાજાનો રાજ્યવિભ્રમૈઃ ॥ ૬૬॥

અસન્ત્યાગાત્પાપકૃતામપાપાંસ્
તુલ્યો દણ્ડઃ સ્પૃશતે મિશ્રભાવાત્ ।
શુષ્કેણાર્દ્રં દહ્યતે મિશ્રભાવાત્
તસ્માત્પાપૈઃ સહ સન્ધિં ન કુર્યાત્ ॥ ૬૭॥

નિજાનુત્પતતઃ શત્રૂન્પઞ્ચ પઞ્ચ પ્રયોજનાન્ ।
યો મોહાન્ન નિગૃહ્ણાતિ તમાપદ્ગ્રસતે નરમ્ ॥ ૬૮॥

અનસૂયાર્જવં શૌચં સન્તોષઃ પ્રિયવાદિતા ।
દમઃ સત્યમનાયાસો ન ભવન્તિ દુરાત્મનામ્ ॥ ૬૯॥

આત્મજ્ઞાનમનાયાસસ્તિતિક્ષા ધર્મનિત્યતા ।
વાક્ચૈવ ગુપ્તા દાનં ચ નૈતાન્યન્ત્યેષુ ભારત ॥ ૭૦॥

આક્રોશ પરિવાદાભ્યાં વિહિંસન્ત્યબુધા બુધાન્ ।
વક્તા પાપમુપાદત્તે ક્ષમમાણો વિમુચ્યતે ॥ ૭૧॥

હિંસા બલમસાધૂનાં રાજ્ઞાં દણ્ડવિધિર્બલમ્ ।
શુશ્રૂષા તુ બલં સ્ત્રીણાં ક્ષમાગુણવતાં બલમ્ ॥ ૭૨॥

વાક્સંયમો હિ નૃપતે સુદુષ્કરતમો મતઃ ।
અર્થવચ્ચ વિચિત્રં ચ ન શક્યં બહુભાષિતુમ્ ॥ ૭૩॥

અભ્યાવહતિ કલ્યાણં વિવિધા વાક્સુભાષિતા ।

સૈવ દુર્ભાષિતા રાજન્નનર્થાયોપપદ્યતે ॥ ૭૪॥

સંરોહતિ શરૈર્વિદ્ધં વનં પરશુના હતમ્ ।
વાચા દુરુક્તં બીભત્સં ન સંરોહતિ વાક્ક્ષતમ્ ॥ ૭૫॥

કર્ણિનાલીકનારાચા નિર્હરન્તિ શરીરતઃ ।
વાક્શલ્યસ્તુ ન નિર્હર્તું શક્યો હૃદિ શયો હિ સઃ ॥ ૭૬॥

વાક્સાયકા વદનાન્નિષ્પતન્તિ
યૈરાહતઃ શોચતિ રત્ર્યહાનિ ।
પરસ્ય નામર્મસુ તે પતન્તિ
તાન્પણ્ડિતો નાવસૃજેત્પરેષુ ॥ ૭૭॥

યસ્મૈ દેવાઃ પ્રયચ્છન્તિ પુરુષાય પરાભવમ્ ।
બુદ્ધિં તસ્યાપકર્ષન્તિ સોઽપાચીનાનિ પશ્યતિ ॥ ૭૮॥

બુદ્ધૌ કલુષ ભૂતાયાં વિનાશે પ્રત્યુપસ્થિતે ।
અનયો નયસઙ્કાશો હૃદયાન્નાપસર્પતિ ॥ ૭૯॥

સેયં બુદ્ધિઃ પરીતા તે પુત્રાણાં તવ ભારત ।
પાણ્ડવાનાં વિરોધેન ન ચૈનામ્ અવબુધ્યસે ॥ ૮૦॥

રાજા લક્ષણસમ્પન્નસ્ત્રૈલોક્યસ્યાપિ યો ભવેત્ ।
શિષ્યસ્તે શાસિતા સોઽસ્તુ ધૃતરાષ્ટ્ર યુધિષ્ઠિરઃ ॥ ૮૧॥

અતીવ સર્વાન્પુત્રાંસ્તે ભાગધેય પુરસ્કૃતઃ ।
તેજસા પ્રજ્ઞયા ચૈવ યુક્તો ધર્માર્થતત્ત્વવિત્ ॥ ૮૨॥

આનૃશંસ્યાદનુક્રોશાદ્યોઽસૌ ધર્મભૃતાં વરઃ ।
ગૌરવાત્તવ રાજેન્દ્ર બહૂન્ક્લેશાંસ્તિતિક્ષતિ ॥ ૮૩॥

॥ ઇતિ શ્રીમહાભારતે ઉદ્યોગપર્વણિ પ્રજાગરપર્વણિ
વિદુરનીતિવાક્યે ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૩૪॥

અધ્યાયઃ ૩૫

ધૃતરાષ્ટ્ર ઉવાચ ।
બ્રૂહિ ભૂયો મહાબુદ્ધે ધર્માર્થસહિતં વચઃ ।
શ ૃણ્વતો નાસ્તિ મે તૃપ્તિર્વિચિત્રાણીહ ભાષસે ॥ ૧॥

વિદુર ઉવાચ ।
સર્વતીર્થેષુ વા સ્નાનં સર્વભૂતેષુ ચાર્જવમ્ ।
ઉભે એતે સમે સ્યાતામાર્જવં વા વિશિષ્યતે ॥ ૨॥

આર્જવં પ્રતિપદ્યસ્વ પુત્રેષુ સતતં વિભો ।
ઇહ કીર્તિં પરાં પ્રાપ્ય પ્રેત્ય સ્વર્ગમવાપ્સ્યસિ ॥ ૩॥

યાવત્કીર્તિર્મનુષ્યસ્ય પુણ્યા લોકેષુ ગીયતે ।
તાવત્સ પુરુષવ્યાઘ્ર સ્વર્ગલોકે મહીયતે ॥ ૪॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
વિરોચનસ્ય સંવાદં કેશિન્યર્થે સુધન્વના ॥ ૫॥

કેશિન્યુવાચ ।
કિં બ્રાહ્મણાઃ સ્વિચ્છ્રેયાંસો દિતિજાઃ સ્વિદ્વિરોચન ।
અથ કેન સ્મ પર્યઙ્કં સુધન્વા નાધિરોહતિ ॥ ૬॥

વિરોચન ઉવાચ ।
પ્રાજાપત્યા હિ વૈ શ્રેષ્ઠા વયં કેશિનિ સત્તમાઃ ।
અસ્માકં ખલ્વિમે લોકાઃ કે દેવાઃ કે દ્વિજાતયઃ ॥ ૭॥

કેશિન્યુવાચ ।
ઇહૈવાસ્સ્વ પ્રતીક્ષાવ ઉપસ્થાને વિરોચન ।
સુધન્વા પ્રાતરાગન્તા પશ્યેયં વાં સમાગતૌ ॥ ૮॥

વિરોચન ઉવાચ ।
તથા ભદ્રે કરિષ્યામિ યથા ત્વં ભીરુ ભાષસે ।
સુધન્વાનં ચ માં ચૈવ પ્રાતર્દ્રષ્ટાસિ સઙ્ગતૌ ॥ ૯॥

વિદુર ઉવાચ ।
અન્વાલભે હિરણ્મયં પ્રાહ્રાદેઽહં તવાસનમ્ ।
એકત્વમુપસમ્પન્નો ન ત્વાસેયં ત્વયા સહ ॥ ૧૦॥

વિરોચન ઉવાચ ।
અન્વાહરન્તુ ફલકં કૂર્ચં વાપ્યથ વા બૃસીમ્ ।
સુધન્વન્ન ત્વમર્હોઽસિ મયા સહ સમાસનમ્ ॥ ૧૧॥

સુધન્વોવાચ ।
પિતાપિ તે સમાસીનમુપાસીતૈવ મામધઃ ।

બાલઃ સુખૈધિતો ગેહે ન ત્વં કિં ચન બુધ્યસે ॥ ૧૨॥

વિરોચન ઉવાચ ।
હિરણ્યં ચ ગવાશ્વં ચ યદ્વિત્તમસુરેષુ નઃ ।
સુધન્વન્વિપણે તેન પ્રશ્નં પૃચ્છાવ યે વિદુઃ ॥ ૧૩॥

સુધન્વોવાચ ।
હિરણ્યં ચ ગવાશ્વં ચ તવૈવાસ્તુ વિરોચન ।
પ્રાણયોસ્તુ પણં કૃત્વા પ્રશ્નં પૃચ્છાવ યે વિદુઃ ॥ ૧૪॥

વિરોચન ઉવાચ ।
આવાં કુત્ર ગમિષ્યાવઃ પ્રાણયોર્વિપણે કૃતે ।
ન હિ દેવેષ્વહં સ્થાતા ન મનુષ્યેષુ કર્હિ ચિત્ ॥ ૧૫॥

સુધન્વોવાચ ।
પિતરં તે ગમિષ્યાવઃ પ્રાણયોર્વિપણે કૃતે ।
પુત્રસ્યાપિ સ હેતોર્હિ પ્રહ્રાદો નાનૃતં વદેત્ ॥ ૧૬॥

પ્રહ્લાદ ઉવાચ ।
ઇમૌ તૌ સમ્પ્રદૃશ્યેતે યાભ્યાં ન ચરિતં સહ ।
આશીવિષાવિવ ક્રુદ્ધાવેકમાર્ગમિહાગતૌ ॥ ૧૭॥

કિં વૈ સહૈવ ચરતો ન પુરા ચરતઃ સહ ।
વિરોચનૈતત્પૃચ્છામિ કિં તે સખ્યં સુધન્વના ॥ ૧૮॥

વિરોચન ઉવાચ ।
ન મે સુધન્વના સખ્યં પ્રાણયોર્વિપણાવહે ।
પ્રહ્રાદ તત્ત્વામૃપ્ચ્છામિ મા પ્રશ્નમનૃતં વદીઃ ॥ ૧૯॥

પ્રહ્લાદ ઉવાચ ।
ઉદકં મધુપર્કં ચાપ્યાનયન્તુ સુધન્વને ।
બ્રહ્મન્નભ્યર્ચનીયોઽસિ શ્વેતા ગૌઃ પીવરી કૃતા ॥ ૨૦॥

સુધન્વોવાચ ।
ઉદકં મધુપર્કં ચ પથ એવાર્પિતં મમ ।
પ્રહ્રાદ ત્વં તુ નૌ પ્રશ્નં તથ્યં પ્રબ્રૂહિ પૃચ્છતોઃ ॥ ૨૧॥

પ્રહ્લાદ ઉવાચ ।
પુર્તો વાન્યો ભવાન્બ્રહ્મન્સાક્ષ્યે ચૈવ ભવેત્સ્થિતઃ ।

તયોર્વિવદતોઃ પ્રશ્નં કથમસ્મદ્વિભો વદેત્ ॥ ૨૨॥

અથ યો નૈવ પ્રબ્રૂયાત્સત્યં વા યદિ વાનૃતમ્ ।
એતત્સુધન્વન્પૃચ્છામિ દુર્વિવક્તા સ્મ કિં વસેત્ ॥ ૨૩॥

સુધન્વોવાચ ।
યાં રાત્રિમધિવિન્ના સ્ત્રી યાં ચૈવાક્ષ પરાજિતઃ ।
યાં ચ ભારાભિતપ્તાઙ્ગો દુર્વિવક્તા સ્મ તાં વસેત્ ॥ ૨૪॥

નગરે પ્રતિરુદ્ધઃ સન્બહિર્દ્વારે બુભુક્ષિતઃ ।
અમિત્રાન્ભૂયસઃ પશ્યન્દુર્વિવક્તા સ્મ તાં વસેત્ ॥ ૨૫॥

પઞ્ચ પશ્વનૃતે હન્તિ દશ હન્તિ ગવાનૃતે ।
શતમશ્વાનૃતે હન્તિ સહસ્રં પુરુષાનૃતે ॥ ૨૬॥

હન્તિ જાતાનજાતાંશ્ચ હિરણ્યાર્થોઽનૃતં વદન્ ।
સર્વં ભૂમ્યનૃતે હન્તિ મા સ્મ ભૂમ્યનૃતં વદીઃ ॥ ૨૭॥

પ્રહ્લાદ ઉવાચ ।
મત્તઃ શ્રેયાનઙ્ગિરા વૈ સુધન્વા ત્વદ્વિરોચન ।
માતાસ્ય શ્રેયસી માતુસ્તસ્માત્ત્વં તેન વૈ જિતઃ ॥ ૨૮॥

વિરોચન સુધન્વાયં પ્રાણાનામીશ્વરસ્તવ ।
સુધન્વન્પુનરિચ્છામિ ત્વયા દત્તં વિરોચનમ્ ॥ ૨૯॥

સુધન્વોવાચ ।
યદ્ધર્મમવૃણીથાસ્ત્વં ન કામાદનૃતં વદીઃ ।
પુનર્દદામિ તે તસ્માત્પુત્રં પ્રહ્રાદ દુર્લભમ્ ॥ ૩૦॥

એષ પ્રહ્રાદ પુત્રસ્તે મયા દત્તો વિરોચનઃ ।
પાદપ્રક્ષાલનં કુર્યાત્કુમાર્યાઃ સન્નિધૌ મમ ॥ ૩૧॥

વિદુર ઉવાચ ।
તસ્માદ્રાજેન્દ્ર ભૂમ્યર્થે નાનૃતં વક્તુમર્હસિ ।
મા ગમઃ સ સુતામાત્યોઽત્યયં પુત્રાનનુભ્રમન્ ॥ ૩૨॥

ન દેવા યષ્ટિમાદાય રક્ષન્તિ પશુપાલવત્ ।
યં તુ રક્ષિતુમિચ્છન્તિ બુદ્ધ્યા સંવિભજન્તિ તમ્ ॥ ૩૩॥

યથા યથા હિ પુરુષઃ કલ્યાણે કુરુતે મનઃ ।

તથા તથાસ્ય સર્વાર્થાઃ સિધ્યન્તે નાત્ર સંશયઃ ॥ ૩૪॥

ન છન્દાંસિ વૃજિનાત્તારયન્તિ
આયાવિનં માયયા વર્તમાનમ્ ।
નીડં શકુન્તા ઇવ જાતપક્ષાશ્
છન્દાંસ્યેનં પ્રજહત્યન્તકાલે ॥ ૩૫॥

મત્તાપાનં કલહં પૂગવૈરં
ભાર્યાપત્યોરન્તરં જ્ઞાતિભેદમ્ ।
રાજદ્વિષ્ટં સ્ત્રીપુમાંસોર્વિવાદં
વર્જ્યાન્યાહુર્યશ્ચ પન્થાઃ પ્રદુષ્ટઃ ॥ ૩૬॥

સામુદ્રિકં વણિજં ચોરપૂર્વં
શલાક ધૂર્તં ચ ચિકિત્સકં ચ ।
અરિં ચ મિત્રં ચ કુશીલવં ચ
નૈતાન્સાખ્યેષ્વધિકુર્વીત સપ્ત ॥ ૩૭॥

માનાગ્નિહોત્રમુત માનમૌનં
માનેનાધીતમુત માનયજ્ઞઃ ।
એતાનિ ચત્વાર્યભયઙ્કરાણિ
ભયં પ્રયચ્છન્ત્યયથા કૃતાનિ ॥ ૩૮॥

અગાર દાહી ગરદઃ કુણ્ડાશી સોમવિક્રયી ।
પર્વ કારશ્ચ સૂચી ચ મિત્ર ધ્રુક્પારદારિકઃ ॥ ૩૯॥

ભ્રૂણહા ગુરુ તલ્પી ચ યશ્ચ સ્યાત્પાનપો દ્વિજઃ ।
અતિતીક્ષ્ણશ્ચ કાકશ્ચ નાસ્તિકો વેદ નિન્દકઃ ॥ ૪૦॥

સ્રુવ પ્રગ્રહણો વ્રાત્યઃ કીનાશશ્ચાર્થવાનપિ ।
રક્ષેત્યુક્તશ્ચ યો હિંસ્યાત્સર્વે બ્રહ્મણહણૈઃ સમાઃ ॥ ૪૧॥

તૃણોક્લયા જ્ઞાયતે જાતરૂપં
યુગે ભદ્રો વ્યવહારેણ સાધુઃ ।
શૂરો ભયેષ્વર્થકૃચ્છ્રેષુ ધીરઃ
કૃચ્છ્રાસ્વાપત્સુ સુહૃદશ્ચારયશ્ ચ ॥ ૪૨॥

જરા રૂપં હરતિ હિ ધૈર્યમાશા
મૃત્યુઃ પ્રાણાન્ધર્મચર્યામસૂયા ।

ક્રોધઃ શ્રિયં શીલમનાર્ય સેવા
હ્રિયં કામઃ સર્વમેવાભિમાનઃ ॥ ૪૩॥

શ્રીર્મઙ્ગલાત્પ્રભવતિ પ્રાગલ્ભ્યાત્સમ્પ્રવર્ધતે ।
દાક્ષ્યાત્તુ કુરુતે મૂલં સંયમાત્પ્રતિતિષ્ઠતિ ॥ ૪૪॥

અષ્ટૌ ગુણાઃ પુરુષં દીપયન્તિ
પ્રજ્ઞા ચ કૌલ્યં ચ દમઃ શ્રુતં ચ ।
પરાક્રમશ્ચાબહુ ભાષિતા ચ
દાનં યથાશક્તિ કૃતજ્ઞતા ચ ॥ ૪૫॥

એતાન્ગુણાંસ્તાત મહાનુભાવાન્
એકો ગુણઃ સંશ્રયતે પ્રસહ્ય ।
રાજા યદા સત્કુરુતે મનુષ્યં
સર્વાન્ગુણાનેષ ગુણોઽતિભાતિ ॥ ૪૬॥

અષ્ટૌ નૃપેમાનિ મનુષ્યલોકે
સ્વર્ગસ્ય લોકસ્ય નિદર્શનાનિ ।
ચત્વાર્યેષામન્વવેતાનિ સદ્ભિશ્
ચત્વાર્યેષામન્વવયન્તિ સન્તઃ ॥ ૪૭॥

યજ્ઞો દાનમધ્યયનં તપશ્ ચ
ચત્વાર્યેતાન્યન્વવેતાનિ સદ્ભિઃ ।
દમઃ સત્યમાર્જવમાનૃશંસ્યં
ચત્વાર્યેતાન્યન્વવયન્તિ સન્તઃ ॥ ૪૮॥

ન સા સભા યત્ર ન સન્તિ વૃદ્ધા
ન તે વૃદ્ધા યે ન વદન્તિ ધર્મમ્ ।
નાસૌ હર્મો યતન સત્યમસ્તિ
ન તત્સત્યં યચ્છલેનાનુવિદ્ધમ્ ॥ ૪૯॥

સત્યં રૂપં શ્રુતં વિદ્યા કૌલ્યં શીલં બલં ધનમ્ ।
શૌર્યં ચ ચિરભાષ્યં ચ દશઃ સંસર્ગયોનયઃ ॥ ૫૦॥

પાપં કુર્વન્પાપકીર્તિઃ પાપમેવાશ્નુતે ફલમ્ ।
પુણ્યં કુર્વન્પુણ્યકીર્તિઃ પુણ્યમેવાશ્નુતે ફલમ્ ॥ ૫૧॥

પાપં પ્રજ્ઞાં નાશયતિ ક્રિયમાણં પુનઃ પુનઃ ।

નષ્ટપ્રજ્ઞઃ પાપમેવ નિત્યમારભતે નરઃ ॥ ૫૨ ॥

પુણ્યં પ્રજ્ઞાં વર્ધયતિ ક્રિયમાણં પુનઃ પુનઃ ।
વૃદ્ધપ્રજ્ઞઃ પુણ્યમેવ નિત્યમારભતે નરઃ ॥ ૫૩ ॥

અસૂયકો દન્દ શૂકો નિષ્ઠુરો વૈરકૃન્નરઃ ।
સ કૃચ્છ્રં મહદાપ્નોતો નચિરાત્પાપમાચરન્ ॥ ૫૪ ॥

અનસૂયઃ કૃતપ્રજ્ઞઃ શોભનાન્યાચરન્સદા ।
અકૃચ્છ્રાત્સુખમાપ્નોતિ સર્વત્ર ચ વિરાજતે ॥ ૫૫ ॥

પ્રજ્ઞામેવાગમયતિ યઃ પ્રાજ્ઞેભ્યઃ સ પણ્ડિતઃ ।
પ્રાજ્ઞો હ્યવાપ્ય ધર્માર્થૌ શક્નોતિ સુખમેધિતુમ્ ॥ ૫૬ ॥

દિવસેનૈવ તત્કુર્યાધેન રાત્રૌ સુખં વસેત્ ।
અષ્ટ માસેન તત્કુર્યાધેન વર્ષાઃ સુખં વસેત્ ॥ ૫૭ ॥

પૂર્વે વયસિ તત્કુર્યાધેન વૃદ્ધસુખં વસેત્ ।
યાવજ્જીવેન તત્કુર્યાધેન પ્રેત્ય સુખં વસેત્ ॥ ૫૮ ॥

જીર્ણમન્નં પ્રશંસન્તિ ભાર્યં ચ ગતયૌવનામ્ ।
શૂરં વિગતસઙ્ગ્રામં ગતપારં તપસ્વિનમ્ ॥ ૫૯ ॥

ધનેનાધર્મલબ્ધેન યચ્છિદ્રમપિધીયતે ।
અસંવૃતં તદ્ભવતિ તતોઽન્યદવદીર્યતે ॥ ૬૦ ॥

ગુરુરાત્મવતાં શાસ્તા શાસા રાજા દુરાત્મનામ્ ।
અથ પ્રચ્છન્નપાપાનાં શાસ્તા વૈવસ્વતો યમઃ ॥ ૬૧ ॥

ઋષીણાં ચ નદીનાં ચ કુલાનાં ચ મહામનામ્ ।
પ્રભવો નાધિગન્તવ્યઃ સ્ત્રીણાં દુશ્ચરિતસ્ય ચ ॥ ૬૨ ॥

દ્વિજાતિપૂજાભિરતો દાતા જ્ઞાતિષુ ચાર્જવી ।
ક્ષત્રિયઃ સ્વર્ગભાગ્રાજંશ્ચિરં પાલયતે મહીમ્ ॥ ૬૩ ॥

સુવર્ણપુષ્પાં પૃથિવીં ચિન્વન્તિ પુરુષાસ્ત્રયઃ ।
શૂરશ્ચ કૃતવિદ્યશ્ચ યશ્ચ જાનાતિ સેવિતુમ્ ॥ ૬૪ ॥

બુદ્ધિશ્રેષ્ઠાનિ કર્માણિ બાહુમધ્યાનિ ભારત ।
તાનિ જઙ્ઘા જઘન્યાનિ ભારપ્રત્યવરાણિ ચ ॥ ૬૫ ॥

દુર્યોધને ચ શકુનૌ મૂઢે દુઃશાસને તથા ।
કર્ણે ચૈશ્વર્યમાધાય કથં ત્વં ભૂતિમિચ્છસિ ॥ ૬૬॥

સર્વૈર્ગુણૈરુપેતાશ્ચ પાણ્ડવા ભરતર્ષભ ।
પિતૃવત્ત્વયિ વર્તન્તે તેષુ વર્તસ્વ પુત્રવત્ ॥ ૬૭॥

॥ ઇતિ શ્રીમહાભારતે ઉદ્યોગપર્વણિ પ્રજાગરપર્વણિ
વિદુરહિતવાક્યે પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૩૫॥

અધ્યાયઃ ૩૬

વિદુર ઉવાચ ।
અત્રૈવોદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
આત્રેયસ્ય ચ સંવાદં સાધ્યાનાં ચેતિ નઃ શ્રુતમ્ ॥ ૧॥

ચરન્તં હંસરૂપેણ મહર્ષિં સંશિતવ્રતમ્ ।
સાધ્યા દેવા મહાપ્રાજ્ઞં પર્યપૃચ્છન્ત વૈ પુરા ॥ ૨॥

સાધ્યા ઊચુઃ ।
સાધ્યા દેવા વયમસ્મો મહર્ષે
દૃષ્ટ્વા ભવન્તં ન શક્નુમોઽનુમાતુમ્ ।
શ્રુતેન ધીરો બુદ્ધિમાંસ્ત્વં મતો નઃ
કાવ્યાં વાચં વક્તુમર્હસ્યુદારામ્ ॥ ૩॥

હંસ ઉવાચ ।
એતત્કાર્યમમરાઃ સંશ્રુતં મે
ધૃતિઃ શમઃ સત્યધર્માનુવૃત્તિઃ ।
ગ્રન્થિં વિનીય હૃદયસ્ય સર્વં
પ્રિયાપ્રિયે ચાત્મવશં નયીત ॥ ૪॥

આક્રુશ્યમાનો નાક્રોશેન્મન્યુરેવ તિતિક્ષિતઃ ।
આક્રોષ્ટારં નિર્દહતિ સુકૃતં ચાસ્ય વિન્દતિ ॥ ૫॥

નાક્રોશી સ્યાન્નાવમાની પરસ્ય
મિત્રદ્રોહી નોત નીચોપસેવી ।
ન ચાતિમાની ન ચ હીનવૃત્તો
રૂક્ષાં વાચં રુશતીં વર્જયીત ॥ ૬॥

મર્માણ્યસ્થીનિ હૃદયં તથાસૂન્
ઘોરા વાચો નિર્દહન્તીહ પુંસામ્ ।
તસ્માદ્વાચં રુશતીં રૂક્ષરૂપાં
ધર્મારામો નિત્યશો વર્જયીત ॥ ૭॥

અરું તુરં પરુષં રૂક્ષવાચં
વાક્કણ્ટકૈર્વિતુદન્તં મનુષ્યાન્ ।
વિદ્યાદલક્ષ્મીકતમં જનાનાં
મુખે નિબદ્ધાં નિરૃતિં વહન્તમ્ ॥ ૮॥

પરશ્ચેદેનમધિવિધ્યેત બાણૈર્
ભૃશં સુતીક્ષ્ણૈરનલાર્ક દીપ્તૈઃ ।
વિરિચ્યમાનોઽપ્યતિરિચ્યમાનો
વિદ્યાત્કવિઃ સુકૃતં મે દધાતિ ॥ ૯॥

યદિ સન્તં સેવતે યદ્યસન્તં
તપસ્વિનં યદિ વા સ્તેનમેવ ।
વાસો યથા રઙ્ગ વશં પ્રયાતિ
તથા સ તેષાં વશમભ્યુપૈતિ ॥ ૧૦॥

વાદં તુ યો ન પ્રવદેન્ન વાદયેદ્
યો નાહતઃ પ્રતિહન્યાન્ન ઘાતયેત્ ।
યો હન્તુકામસ્ય ન પાપમિચ્છેત્
તસ્મૈ દેવાઃ સ્પૃહયન્ત્યાગતાય ॥ ૧૧॥

અવ્યાહૃતં વ્યાહૃતાચ્છ્રેય આહુઃ
સત્યં વદેદ્વ્યાહૃતં તદ્દ્વિતીયમ્ ।
પ્રિયંવદેદ્વ્યાહૃતં તત્તૃતીયં
ધર્મ્યં વદેદ્વ્યાહૃતં તચ્ચતુર્થમ્ ॥ ૧૨॥

યાદૃશૈઃ સંવિવદતે યાદૃશાંશ્ ચોપસેવતે ।
યાદૃગિચ્છેચ્ચ ભવિતું તાદૃગ્ભવતિ પૂરુષઃ ॥ ૧૩॥

યતો યતો નિવર્તતે તતસ્તતો વિમુચ્યતે ।
નિવર્તનાદ્ધિ સર્વતો ન વેત્તિ દુઃખમણ્વપિ ॥ ૧૪॥

ન જીયતે નોત જિગીષતેઽન્યાન્
ન વૈરકૃચ્ચાપ્રતિઘાતકશ્ ચ ।
નિન્દા પ્રશંસાસુ સમસ્વભાવો
ન શોચતે હૃષ્યતિ નૈવ ચાયમ્ ॥ ૧૫॥

ભાવમિચ્છતિ સર્વસ્ય નાભાવે કુરુતે મતિમ્ ।
સત્યવાદી મૃદુર્દાન્તો યઃ સ ઉત્તમપૂરુષઃ ॥ ૧૬॥

નાનર્થકં સાન્ત્વયતિ પ્રતિજ્ઞાય દદાતિ ચ ।
રાદ્ધાપરાદ્ધે જાનાતિ યઃ સ મધ્યમપૂરુષઃ ॥ ૧૭॥

દુઃશાસનસ્તૂપહન્તા ન શાસ્તા
નાવર્તતે મન્યુવશાત્કૃતઘ્નઃ ।
ન કસ્ય ચિન્મિત્રમથો દુરાત્મા
કલાશ્ચૈતા અધમસ્યેહ પુંસઃ ॥ ૧૮॥

ન શ્રદ્ધાતિ કલ્યાણં પરેભ્યોઽપ્યાત્મશઙ્કિતઃ ।
નિરાકરોતિ મિત્રાણિ યો વૈ સોઽધમ પૂરુષઃ ॥ ૧૯॥

ઉત્તમાનેવ સેવેત પ્રાપ્તે કાલે તુ મધ્યમાન્ ।
અધમાંસ્તુ ન સેવેત ય ઇચ્છેચ્છ્રેય આત્મનઃ ॥ ૨૦॥

પ્રાપ્નોતિ વૈ વિત્તમસદ્બલેન
નિત્યોત્થાનાત્પ્રજ્ઞયા પૌરુષેણ ।
ન ત્વેવ સમ્યગ્લભતે પ્રશંસાં
ન વૃત્તમાપ્નોતિ મહાકુલાનામ્ ॥ ૨૧॥

ધૃતરાષ્ટ્ર ઉવાચ ।
મહાકુલાનાં સ્પૃહયન્તિ દેવા
ધર્માર્થવૃદ્ધાશ્ચ બહુશ્રુતાશ્ ચ ।
પૃચ્છામિ ત્વાં વિદુર પ્રશ્નમેતં
ભવન્તિ વૈ કાનિ મહાકુલાનિ ॥ ૨૨॥

વિદુર ઉવાચ ।
તમો દમો બ્રહ્મવિત્ત્વં વિતાનાઃ
પુણ્યા વિવાહાઃ સતતાન્ન દાનમ્ ।
યેષ્વેવૈતે સપ્તગુણા ભવન્તિ

સમ્યગ્વૃત્તાસ્તાનિ મહાકુલાનિ ॥ ૨૩॥

યેષાં ન વૃત્તં વ્યથતે ન યોનિર્
વૃત્તપ્રસાદેન ચરન્તિ ધર્મમ્ ।
યે કીર્તિમિચ્છન્તિ કુલે વિશિષ્ટાં
ત્યક્તાનૃતાસ્તાનિ મહાકુલાનિ ॥ ૨૪॥

અનિજ્યયાવિવાહૈશ્ચ વેદસ્યોત્સાદનેન ચ ।
કુલાન્યકુલતાં યાન્તિ ધર્મસ્યાતિક્રમેણ ચ ॥ ૨૫॥

દેવ દ્રવ્યવિનાશેન બ્રહ્મ સ્વહરણેન ચ ।
કુલાન્યકુલતાં યાન્તિ બ્રાહ્મણાતિક્રમેણ ચ ॥ ૨૬॥

બ્રાહ્મણાનાં પરિભવાત્પરિવાદાચ્ચ ભારત ।
કુલાન્યકુલતાં યાન્તિ ન્યાસાપહરણેન ચ ॥ ૨૭॥

કુલાનિ સમુપેતાનિ ગોભિઃ પુરુષતોઽશ્વતઃ ।
કુલસઙ્ખ્યાં ન ગચ્છન્તિ યાનિ હીનાનિ વૃત્તતઃ ॥ ૨૮॥

વૃત્તતસ્ત્વવિહીનાનિ કુલાન્યલ્પધનાન્યપિ ।
કુલસઙ્ખ્યાં તુ ગચ્છન્તિ કર્ષન્તિ ચ મયદ્યશઃ ॥ ૨૯॥

મા નઃ કુલે વૈરકૃત્કશ્ ચિદસ્તુ
રાજામાત્યો મા પરસ્વાપહારી ।
મિત્રદ્રોહી નૈકૃતિકોઽનૃતી વા
પૂર્વાશી વા પિતૃદેવાતિથિભ્યઃ ॥ ૩૦॥

યશ્ચ નો બ્રાહ્મણં હન્યાદ્યશ્ચ નો બ્રાહ્મણાન્દ્વિષેત્ ।
ન નઃ સ સમિતિં ગચ્છેદ્યશ્ચ નો નિર્વપેત્કૃષિમ્ ॥ ૩૧॥

તૃણાનિ ભૂમિરુદકં વાક્ચતુર્થી ચ સૂનૃતા ।
સતામેતાનિ ગેહેષુ નોચ્છિદ્યન્તે કદા ચન ॥ ૩૨॥

શ્રદ્ધયા પરયા રાજન્નુપનીતાનિ સત્કૃતિમ્ ।
પ્રવૃત્તાનિ મહાપ્રાજ્ઞ ધર્મિણાં પુણ્યકર્મણામ્ ॥ ૩૩॥

સૂક્ષ્મોઽપિ ભારં નૃપતે સ્યન્દનો વૈ
શક્તો વોઢું ન તથાન્યે મહીજાઃ ।
એવં યુક્તા ભારસહા ભવન્તિ

મહાકુલીના ન તથાન્યે મનુષ્યાઃ ॥ ૩૪॥

ન તન્મિત્રં યસ્ય કોપાદ્બિભેતિ
યદ્વા મિત્રં શઙ્કિતેનોપચર્યમ્ ।
યસ્મિન્મિત્રે પિતરીવાશ્વસીત
તદ્વૈ મિત્રં સઙ્ગતાનીતરાણિ ॥ ૩૫॥

યદિ ચેદપ્યસમ્બન્ધો મિત્રભાવેન વર્તતે ।
સ એવ બન્ધુસ્તન્મિત્રં સા ગતિસ્તત્પરાયણમ્ ॥ ૩૬॥

ચલચિત્તસ્ય વૈ પુંસો વૃદ્ધાનનુપસેવતઃ ।
પારિપ્લવમતેર્નિત્યમધ્રુવો મિત્ર સઙ્ગ્રહઃ ॥ ૩૭॥

ચલચિત્તમનાત્માનમિન્દ્રિયાણાં વશાનુગમ્ ।
અર્થાઃ સમતિવર્તન્તે હંસાઃ શુષ્કં સરો યથા ॥ ૩૮॥

અકસ્માદેવ કુપ્યન્તિ પ્રસીદન્ત્યનિમિત્તતઃ ।
શીલમેતદસાધૂનામભ્રં પારિપ્લવં યથા ॥ ૩૯॥

સત્કૃતાશ્ચ કૃતાર્થાશ્ચ મિત્રાણાં ન ભવન્તિ યે ।
તાન્મૃતાનપિ ક્રવ્યાદાઃ કૃતઘ્નાન્નોપભુઞ્જતે ॥ ૪૦॥

અર્થયેદેવ મિત્રાણિ સતિ વાસતિ વા ધને ।
નાનર્થયન્વિજાનાતિ મિત્રાણાં સારફલ્ગુતામ્ ॥ ૪૧॥

સન્તાપાદ્ભ્રશ્યતે રૂપં સન્તાપાદ્ભ્રશ્યતે બલમ્ ।
સન્તાપાદ્ભ્રશ્યતે જ્ઞાનં સન્તાપાદ્વ્યાધિમૃચ્છતિ ॥ ૪૨॥

અનવાપ્યં ચ શોકેન શરીરં ચોપતપ્યતે ।
અમિત્રાશ્ચ પ્રહૃષ્યન્તિ મા સ્મ શોકે મનઃ કૃથાઃ ॥ ૪૩॥

પુનર્નરો મ્રિયતે જાયતે ચ
પુનર્નરો હીયતે વર્ધતે પુનઃ ।
પુનર્નરો યાચતિ યાચ્યતે ચ
પુનર્નરઃ શોચતિ શોચ્યતે પુનઃ ॥ ૪૪॥

સુખં ચ દુઃખં ચ ભવાભવૌ ચ
લાભાલાભૌ મરણં જીવિતં ચ ।
પર્યાયશઃ સર્વમિહ સ્પૃશન્તિ

તસ્માદ્ધીરો નૈવ હૃષ્યેન્ન શોચેત્ ॥ ૪૫॥

ચલાનિ હીમાનિ ષડિન્દ્રિયાણિ
તેષાં યદ્યદ્વર્તતે યત્ર યત્ર ।
તતસ્તતઃ સ્રવતે બુદ્ધિરસ્ય
છિદ્રોદ કુમ્ભાદિવ નિત્યમમ્ભઃ ॥ ૪૬॥

ધૃતરાષ્ટ્ર ઉવાચ ।
તનુરુચ્છઃ શિખી રાજા મિથ્યોપચરિતો મયા ।
મન્દાનાં મમ પુત્રાણાં યુદ્ધેનાન્તં કરિષ્યતિ ॥ ૪૭॥

નિત્યોદ્વિગ્નમિદં સર્વં નિત્યોદ્વિગ્નમિદં મનઃ ।
યત્તત્પદમનુદ્વિગ્નં તન્મે વદ મહામતે ॥ ૪૮॥

વિદુર ઉવાચ ।
નાન્યત્ર વિદ્યા તપસોર્નાન્યત્રેન્દ્રિય નિગ્રહાત્ ।
નાન્યત્ર લોભસન્ત્યાગાચ્છાન્તિં પશ્યામ તેઽનઘ ॥ ૪૯॥

બુદ્ધ્યા ભયં પ્રણુદતિ તપસા વિન્દતે મહત્ ।
ગુરુશુશ્રૂષયા જ્ઞાનં શાન્તિં ત્યાગેન વિન્દતિ ॥ ૫૦॥

અનાશ્રિતા દાનપુણ્યં વેદ પુણ્યમનાશ્રિતાઃ ।
રાગદ્વેષવિનિર્મુક્તા વિચરન્તીહ મોક્ષિણઃ ॥ ૫૧॥

સ્વધીતસ્ય સુયુદ્ધસ્ય સુકૃતસ્ય ચ કર્મણઃ ।
તપસશ્ચ સુતપ્તસ્ય તસ્યાન્તે સુખમેધતે ॥ ૫૨॥

સ્વાસ્તીર્ણાનિ શયનાનિ પ્રપન્ના
ન વૈ ભિન્ના જાતુ નિદ્રાં લભન્તે ।
ન સ્ત્રીષુ રાજન્રતિમાપ્નુવન્તિ
ન માગધૈઃ સ્તૂયમાના ન સૂતૈઃ ॥ ૫૩॥

ન વૈ ભિન્ના જાતુ ચરન્તિ ધર્મં
ન વૈ સુખં પ્રાપ્નુવન્તીહ ભિન્નાઃ ।
ન વૈ ભિન્ના ગૌરવં માનયન્તિ
ન વૈ ભિન્નાઃ પ્રશમં રોચયન્તિ ॥ ૫૪॥

ન વૈ તેષાં સ્વદતે પથ્યમુક્તં
યોગક્ષેમં કલ્પતે નોત તેષામ્ ।

ભિન્નાનાં વૈ મનુજેન્દ્ર પરાયણં
ન વિદ્યતે કિં ચિદન્યદ્વિનાશાત્ ॥ ૫૫॥

સમ્ભાવ્યં ગોષુ સમ્પન્નં સમ્ભાવ્યં બ્રાહ્મણે તપઃ ।
સમ્ભાવ્યં સ્ત્રીષુ ચાપલ્યં સમ્ભાવ્યં જ્ઞાતિતો ભયમ્ ॥ ૫૬॥

તન્તવોઽપ્યાયતા નિત્યં તન્તવો બહુલાઃ સમાઃ ।
બહૂન્બહુત્વાદાયાસાન્સહન્તીત્યુપમા સતામ્ ॥ ૫૭॥

ધૂમાયન્તે વ્યપેતાનિ જ્વલન્તિ સહિતાનિ ચ ।
ધૃતરાષ્ટ્રોલ્મુકાનીવ જ્ઞાતયો ભરતર્ષભ ॥ ૫૮॥

બ્રાહ્મણેષુ ચ યે શૂરાઃ સ્ત્રીષુ જ્ઞાતિષુ ગોષુ ચ ।
વૃન્તાદિવ ફલં પક્વં ધૃતરાષ્ટ્ર પતન્તિ તે ॥ ૫૯॥

મહાનપ્યેકજો વૃક્ષો બલવાન્સુપ્રતિષ્ઠિતઃ ।
પ્રસહ્ય એવ વાતેન શાખા સ્કન્ધં વિમર્દિતુમ્ ॥ ૬૦॥

અથ યે સહિતા વૃક્ષાઃ સઙ્ઘશઃ સુપ્રતિષ્ઠિતાઃ ।
તે હિ શીઘ્રતમાન્વાતાન્સહન્તેઽન્યોન્યસંશ્રયાત્ ॥ ૬૧॥

એવં મનુષ્યમપ્યેકં ગુણૈરપિ સમન્વિતમ્ ।
શક્યં દ્વિષન્તો મન્યન્તે વાયુર્દ્રુમમિવૈકજમ્ ॥ ૬૨॥

અન્યોન્યસમુપષ્ટમ્ભાદન્યોન્યાપાશ્રયેણ ચ ।
જ્ઞાતયઃ સમ્પ્રવર્ધન્તે સરસીવોત્પલાન્યુત ॥ ૬૩॥

અવધ્યા બ્રાહ્મણા ગાવો સ્ત્રિયો બાલાશ્ચ જ્ઞાતયઃ ।
યેષાં ચાન્નાનિ ભુઞ્જીત યે ચ સ્યુઃ શરણાગતાઃ ॥ ૬૪॥

ન મનુષ્યે ગુણઃ કશ્ચિદન્યો ધનવતામ્ અપિ ।
અનાતુરત્વાદ્ભદ્રં તે મૃતકલ્પા હિ રોગિણઃ ॥ ૬૫॥

અવ્યાધિજં કટુકં શીર્ષ રોગં
પાપાનુબન્ધં પરુષં તીક્ષ્ણમુગ્રમ્ ।
સતાં પેયં યન્ન પિબન્ત્યસન્તો
મન્યું મહારાજ પિબ પ્રશામ્ય ॥ ૬૬॥

રોગાર્દિતા ન ફલાન્યાદ્રિયન્તે
ન વૈ લભન્તે વિષયેષુ તત્ત્વમ્ ।

દુઃખોપેતા રોગિણો નિત્યમેવ
ન બુધ્યન્તે ધનભોગાન્ન સૌખ્યમ્ ॥ ૬૭॥

પુરા હ્યુક્તો નાકરોસ્ત્વં વચો મે
દ્યૂતે જિતાં દ્રૌપદીં પ્રેક્ષ્ય રાજન્ ।
દુર્યોધનં વારયેત્યક્ષવત્યાં
કિતવત્વં પણ્ડિતા વર્જયન્તિ ॥ ૬૮॥

ન તદ્બલં યન્મૃદુના વિરુધ્યતે
મિશ્રો ધર્મસ્તરસા સેવિતવ્યઃ ।
પ્રધ્વંસિની ક્રૂરસમાહિતા શ્રીર્
મૃદુપ્રૌઢા ગચ્છતિ પુત્રપૌત્રાન્ ॥ ૬૯॥

ધાર્તરાષ્ટ્રાઃ પાણ્ડવાન્પાલયન્તુ
પાણ્ડોઃ સુતાસ્તવ પુત્રાંશ્ચ પાન્તુ ।
એકારિમિત્રાઃ કુરવો હ્યેકમન્ત્રા
જીવન્તુ રાજન્સુખિનઃ સમૃદ્ધાઃ ॥ ૭૦॥

મેઢીભૂતઃ કૌરવાણાં ત્વમદ્ય
ત્વય્યાધીનં કુરુ કુલમાજમીઢ ।
પાર્થાન્બાલાન્વનવાસ પ્રતપ્તાન્
ગોપાયસ્વ સ્વં યશસ્તાત રક્ષન્ ॥ ૭૧॥

સન્ધત્સ્વ ત્વં કૌરવાન્પાણ્ડુપુત્રૈર્
મા તેઽન્તરં રિપવઃ પ્રાર્થયન્તુ ।
સત્યે સ્થિતાસ્તે નરદેવ સર્વે
દુર્યોધનં સ્થાપય ત્વં નરેન્દ્ર ॥ ૭૨॥

॥ ઇતિ શ્રીમહાભારતે ઉદ્યોગપર્વણિ પ્રજાગરપર્વણિ
વિદુરહિતવાક્યે ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૩૬॥

અધ્યાયઃ ૩૭

વિદુર ઉવાચ ।
સપ્તદશેમાન્રાજેન્દ્ર મનુઃ સ્વાયમ્ભુવોઽબ્રવીત્ ।
વૈચિત્રવીર્ય પુરુષાનાકાશં મુષ્ટિભિર્ઘ્નતઃ ॥ ૧॥

તાનેવિન્દ્રસ્ય હિ ધનુરનામ્યં નમતોઽબ્રવીત્ ।
અથો મરીચિનઃ પાદાનનામ્યાન્નમતસ્તથા ॥ ૨॥

યશ્ચાશિષ્યં શાસતિ યશ્ ચ કુપ્યતે
યશ્ચાતિવેલં ભજતે દ્વિષન્તમ્ ।
સ્ત્રિયશ્ચ યોઽરક્ષતિ ભદ્રમસ્તુ તે
યશ્ચાયાચ્યં યાચતિ યશ્ ચ કત્થતે ॥ ૩॥

યશ્ચાભિજાતઃ પ્રકરોત્યકાર્યં
યશ્ચાબલો બલિના નિત્યવૈરી ।
અશ્રદ્દ્ધાનાય ચ યો બ્રવીતિ
યશ્ચાકામ્યં કામયતે નરેન્દ્ર ॥ ૪॥

વધ્વા હાસં શ્વશુરો યશ્ ચ મન્યતે
વધ્વા વસન્નુત યો માનકામઃ ।
પરક્ષેત્રે નિર્વપતિ યશ્ચ બીજં
સ્ત્રિયં ચ યઃ પરિવદતેઽતિવેલમ્ ॥ ૫॥

યશ્ચૈવ લબ્ધ્વા ન સ્મરામીત્યુવાચ
દત્ત્વા ચ યઃ કત્થતિ યાચ્યમાનઃ ।
યશ્ચાસતઃ સાન્ત્વમુપાસતીહ
એતેઽનુયાન્ત્યનિલં પાશહસ્તાઃ ॥ ૬॥

યસ્મિન્યથા વર્તતે યો મનુષ્યસ્
તસ્મિંસ્તથા વર્તિતવ્યં સ ધર્મઃ ।
માયાચારો માયયા વર્તિતવ્યઃ
સાધ્વાચારઃ સાધુના પ્રત્યુદેયઃ ॥ ૭॥

ધૃતરાષ્ટ્ર ઉવાચ ।
શતાયુરુક્તઃ પુરુષઃ સર્વવેદેષુ વૈ યદા ।
નાપ્નોત્યથ ચ તત્સર્વમાયુઃ કેનેહ હેતુના ॥ ૮॥

વિદુર ઉવાચ ।
અતિવાદોઽતિમાનશ્ચ તથાત્યાગો નરાધિપઃ ।
ક્રોધશ્ચાતિવિવિત્સા ચ મિત્રદ્રોહશ્ચ તાનિ ષટ્ ॥ ૯॥

એત એવાસયસ્તીક્ષ્ણાઃ કૃન્તન્ત્યાયૂંષિ દેહિનામ્ ।

એતાનિ માનવાન્ઘ્નન્તિ ન મૃત્યુર્ભદ્રમસ્તુ તે ॥ ૧૦॥

વિશ્વસ્તસ્યૈતિ યો દારાન્યશ્ચાપિ ગુરુ તલ્પગઃ ।
વૃષલી પતિર્દ્વિજો યશ્ચ પાનપશ્ચૈવ ભારત ॥ ૧૧॥

શરણાગતહા ચૈવ સર્વે બ્રહ્મહણૈઃ સમાઃ ।
એતૈઃ સમેત્ય કર્તવ્યં પ્રાયશ્ચિત્તમિતિ શ્રુતિઃ ॥ ૧૨॥

ગૃહી વદાન્યોઽનપવિદ્ધ વાક્યઃ
શેષાન્ન ભોકાપ્યવિહિંસકશ્ ચ ।
નાનર્થકૃત્ત્યક્તકલિઃ કૃતજ્ઞઃ
સત્યો મૃદુઃ સ્વર્ગમુપૈતિ વિદ્વાન્ ॥ ૧૩॥

સુલભાઃ પુરુષા રાજન્સતતં પ્રિયવાદિનઃ ।
અપ્રિયસ્ય તુ પથ્યસ્ય વક્તા શ્રોતા ચ દુર્લભઃ ॥ ૧૪॥

યો હિ ધર્મં વ્યપાશ્રિત્ય હિત્વા ભર્તુઃ પ્રિયાપ્રિયે ।
અપ્રિયાણ્યાહ પથ્યાનિ તેન રાજા સહાયવાન્ ॥ ૧૫॥

ત્યજેત્કુલાર્થે પુરુષં ગ્રામસ્યાર્થે કુલં ત્યજેત્ ।
ગ્રામં જનપદસ્યાર્થે આત્માર્થે પૃથિવીં ત્યજેત્ ॥ ૧૬॥

આપદર્થં ધનં રક્ષેદ્દારાન્રક્ષેદ્ધનૈરપિ ।
આત્માનં સતતં રક્ષેદ્દારૈરપિ ધનૈરપિ ॥ ૧૭॥

ઉક્તં મયા દ્યૂતકાલેઽપિ રાજન્
નૈવં યુક્તં વચનં પ્રાતિપીય ।
તદૌષધં પથ્યમિવાતુરસ્ય
ન રોચતે તવ વૈચિત્ર વીર્ય ॥ ૧૮॥

કાકૈરિમાંશ્ચિત્રબર્હાન્મયૂરાન્
પરાજૈષ્ઠાઃ પાણ્ડવાન્ધાર્તરાષ્ટ્રૈઃ ।
હિત્વા સિંહાન્ક્રોષ્ટુ કાન્ગૂહમાનઃ
પ્રાપ્તે કાલે શોચિતા ત્વં નરેન્દ્ર ॥ ૧૯॥

યસ્તાત ન ક્રુધ્યતિ સર્વકાલં
ભૃત્યસ્ય ભક્તસ્ય હિતે રતસ્ય ।
તસ્મિન્ભૃત્યા ભર્તરિ વિશ્વસન્તિ
ન ચૈનમાપત્સુ પરિત્યજન્તિ ॥ ૨૦॥

ન ભૃત્યાનાં વૃત્તિ સંરોધનેન
બાહ્યં જનં સઞ્જિઘૃક્ષેદપૂર્વમ્ ।
ત્યજન્તિ હ્યેનમુચિતાવરુદ્ધાઃ
સ્નિગ્ધા હ્યમાત્યાઃ પરિહીનભોગાઃ ॥ ૨૧॥

કૃત્યાનિ પૂર્વં પરિસઙ્ખ્યાય સર્વાણ્ય્
આયવ્યયાવનુરૂપાં ચ વૃત્તિમ્ ।
સઙ્ગૃહ્ણીયાદનુરૂપાન્સહાયાન્
સહાયસાધ્યાનિ હિ દુષ્કરાણિ ॥ ૨૨॥

અભિપ્રાયં યો વિદિત્વા તુ ભર્તુઃ
સર્વાણિ કાર્યાણિ કરોત્યતન્દ્રીઃ ।
વક્તા હિતાનામનુરક્ત આર્યઃ
શક્તિજ્ઞ આત્મેવ હિ સોઽનુકમ્પ્યઃ ॥ ૨૩॥

વાક્યં તુ યો નાદ્રિયતેઽનુશિષ્ટઃ
પ્રત્યાહ યશ્ચાપિ નિયુજ્યમાનઃ ।
પ્રજ્ઞાભિમાની પ્રતિકૂલવાદી
ત્યાજ્યઃ સ તાદૃક્ત્વરયૈવ ભૃત્યઃ ॥ ૨૪॥

અસ્તબ્ધમક્લીબમદીર્ઘસૂત્રં
સાનુક્રોશં શ્લક્ષ્ણમહાર્યમન્યૈઃ ।
અરોગ જાતીયમુદારવાક્યં
દૂતં વદન્ત્યષ્ટ ગુણોપપન્નમ્ ॥ ૨૫॥

ન વિશ્વાસાજ્જાતુ પરસ્ય ગેહં
ગચ્છેન્નરશ્ચેતયાનો વિકાલે ।
ન ચત્વરે નિશિ તિષ્ઠેન્નિગૂઢો
ન રાજન્યાં યોષિતં પ્રાર્થયીત ॥ ૨૬॥

ન નિહ્નવં સત્ર ગતસ્ય ગચ્છેત્
સંસૃષ્ટ મન્ત્રસ્ય કુસઙ્ગતસ્ય ।
ન ચ બ્રૂયાન્નાશ્વસામિ ત્વયીતિ
સ કારણં વ્યપદેશં તુ કુર્યાત્ ॥ ૨૭॥

ઘૃણી રાજા પુંશ્ચલી રાજભૃત્યઃ

પુત્રો ભ્રાતા વિધવા બાલ પુત્રા ।
સેના જીવી ચોધ્દૃત ભક્ત એવ
વ્યવહારે વૈ વર્જનીયાઃ સ્યુરેતે ॥ ૨૮॥

ગુણા દશ સ્નાનશીલં ભજન્તે
બલં રૂપં સ્વરવર્ણપ્રશુધ્દિઃ ।
સ્પર્શશ્ચ ગન્ધશ્ચ વિશુધ્દતા ચ
શ્રીઃ સૌકુમાર્યં પ્રવરાશ્ચ નાર્યઃ ॥ ૨૯॥

ગુણાશ્ચ ષણ્મિતભુક્તં ભજન્તે
આરોગ્યમાયુશ્ચ સુખં બલં ચ ।
અનાવિલં ચાસ્ય ભવેદપત્યં
ન ચૈનમાદ્યૂન ઇતિ ક્ષિપન્તિ ॥ ૩૦॥

અકર્મ શીલં ચ મહાશનં ચ
લોકદ્વિષ્ટં બહુ માયં નૃશંસમ્ ।
અદેશકાલજ્ઞમનિષ્ટ વેષમ્
એતાન્ગૃહે ન પ્રતિવાસયીત ॥ ૩૧॥

કદર્યમાક્રોશકમશ્રુતં ચ
વરાક સમ્ભૂતમમાન્ય માનિનમ્ ।
નિષ્ઠૂરિણં કૃતવૈરં કૃતઘ્નમ્
એતાન્ભૃતાર્તોઽપિ ન જાતુ યાચેત્ ॥ ૩૨॥

સઙ્ક્લિષ્ટકર્માણમતિપ્રવાદં
નિત્યાનૃતં ચાદૃઢ ભક્તિકં ચ ।
વિકૃષ્ટરાગં બહુમાનિનં ચાપ્ય્
એતાન્ન સેવેત નરાધમાન્ષટ્ ॥ ૩૩॥

સહાયબન્ધના હ્યર્થાઃ સહાયાશ્ચાર્થબન્ધનાઃ ।
અન્યોન્યબન્ધનાવેતૌ વિનાન્યોન્યં ન સિધ્યતઃ ॥ ૩૪॥

ઉત્પાદ્ય પુત્રાનનૃણાંશ્ચ કૃત્વા
વૃત્તિં ચ તેભ્યોઽનુવિધાય કાં ચિત્ ।
સ્થાને કુમારીઃ પ્રતિપાદ્ય સર્વા
અરણ્યસંસ્થો મુનિવદ્બુભૂષેત્ ॥ ૩૫॥

હિતં યત્સર્વભૂતાનામાત્મનશ્ચ સુખાવહમ્ ।
તત્કુર્યાદીશ્વરો હ્યેતન્મૂલં ધર્માર્થસિદ્ધયે ॥ ૩૬॥

બુદ્ધિઃ પ્રભાવસ્તેજશ્ચ સત્ત્વમુત્થાનમેવ ચ ।
વ્યવસાયશ્ચ યસ્ય સ્યાત્તસ્યાવૃત્તિ ભયં કુતઃ ॥ ૩૭॥

પશ્ય દોષાન્પાણ્ડવૈર્વિગ્રહે ત્વં
યત્ર વ્યથેરન્નપિ દેવાઃ સ શક્રાઃ ।
પુત્રૈર્વૈરં નિત્યમુદ્વિગ્નવાસો
યશઃ પ્રણાશો દ્વિષતાં ચ હર્ષઃ ॥ ૩૮॥

ભીષ્મસ્ય કોપસ્તવ ચેન્દ્ર કલ્પ
દ્રોણસ્ય રાજ્ઞશ્ચ યુધિષ્ઠિરસ્ય ।
ઉત્સાદયેલ્લોકમિમં પ્રવૃદ્ધઃ
શ્વેતો ગ્રહસ્તિર્યગિવાપતન્ખે ॥ ૩૯॥

તવ પુત્રશતં ચૈવ કર્ણઃ પઞ્ચ ચ પાણ્ડવાઃ ।
પૃથિવીમનુશાસેયુરખિલાં સાગરામ્બરામ્ ॥ ૪૦॥

ધાર્તરાષ્ટ્રા વનં રાજન્વ્યાઘ્રાઃ પાણ્ડુસુતા મતાઃ ।
મા વનં છિન્ધિ સ વ્યાઘ્રં મા વ્યાઘ્રાન્નીનશો વનાત્ ॥ ૪૧॥

ન સ્યાદ્વનમૃતે વ્યાઘ્રાન્વ્યાઘ્રા ન સ્યુરૃતે વનમ્ ।
વનં હિ રક્ષ્યતે વ્યાઘ્રૈર્વ્યાઘ્રાન્રક્ષતિ કાનનમ્ ॥ ૪૨॥

ન તથેચ્છન્ત્યકલ્યાણાઃ પરેષાં વેદિતું ગુણાન્ ।
યથૈષાં જ્ઞાતુમિચ્છન્તિ નૈર્ગુણ્યં પાપચેતસઃ ॥ ૪૩॥

અર્થસિદ્ધિં પરામિચ્છન્ધર્મમેવાદિતશ્ ચરેત્ ।
ન હિ ધર્માદપૈત્યર્થઃ સ્વર્ગલોકાદિવામૃતમ્ ॥ ૪૪॥

યસ્યાત્મા વિરતઃ પાપાત્કલ્યાણે ચ નિવેશિતઃ ।
તેન સર્વમિદં બુદ્ધં પ્રકૃતિર્વિકૃતિશ્ચ યા ॥ ૪૫॥

યો ધર્મમર્થં કામં ચ યથાકાલં નિષેવતે ।
ધર્માર્થકામસંયોગં યોઽમુત્રેહ ચ વિન્દતિ ॥ ૪૬॥

સન્નિયચ્છતિ યો વેગમુત્થિતં ક્રોધહર્ષયોઃ ।
સ શ્રિયો ભાજનં રાજન્યશ્ચાપત્સુ ન મુહ્યતિ ॥ ૪૭॥

બલં પઞ્ચ વિધં નિત્યં પુરુષાણાં નિબોધ મે ।
યત્તુ બાહુબલં નામ કનિષ્ઠં બલમુચ્યતે ॥ ૪૮॥

અમાત્યલાભો ભદ્રં તે દ્વિતીયં બલમુચ્યતે ।
ધનલાભસ્તૃતીયં તુ બલમાહુર્જિગીષવઃ ॥ ૪૯॥

યત્ત્વસ્ય સહજં રાજન્પિતૃપૈતામહં બલમ્ ।
અભિજાત બલં નામ તચ્ચતુર્થં બલં સ્મૃતમ્ ॥ ૫૦॥

યેન ત્વેતાનિ સર્વાણિ સઙ્ગૃહીતાનિ ભારત ।
યદ્બલાનાં બલં શ્રેષ્ઠં તત્પ્રજ્ઞા બલમુચ્યતે ॥ ૫૧॥

મહતે યોઽપકારાય નરસ્ય પ્રભવેન્નરઃ ।
તેન વૈરં સમાસજ્ય દૂરસ્થોઽસ્મીતિ નાશ્વસેત્ ॥ ૫૨॥

સ્ત્રીષુ રાજસુ સર્પેષુ સ્વાધ્યાયે શત્રુસેવિષુ ।
ભોગે ચાયુષિ વિશ્વાસં કઃ પ્રાજ્ઞઃ કર્તુમર્હતિ ॥ ૫૩॥

પ્રજ્ઞા શરેણાભિહતસ્ય જન્તોશ્
ચિકિત્સકાઃ સન્તિ ન ચૌષધાનિ ।
ન હોમમન્ત્રા ન ચ મઙ્ગલાનિ
નાથર્વણા નાપ્યગદાઃ સુસિદ્ધાઃ ॥ ૫૪॥

સર્પશ્ચાગ્નિશ્ચ સિંહશ્ચ કુલપુત્રશ્ચ ભારત ।
નાવજ્ઞેયા મનુષ્યેણ સર્વે તે હ્યતિતેજસઃ ॥ ૫૫॥

અગ્નિસ્તેજો મહલ્લોકે ગૂઢસ્તિષ્ઠતિ દારુષુ ।
ન ચોપયુઙ્ક્તે તદ્દારુ યાવન્નો દીપ્યતે પરૈઃ ॥ ૫૬॥

સ એવ ખલુ દારુભ્યો યદા નિર્મથ્ય દીપ્યતે ।
તદા તચ્ચ વનં ચાન્યન્નિર્દહત્યાશુ તેજસા ॥ ૫૭॥

એવમેવ કુલે જાતાઃ પાવકોપમ તેજસઃ ।
ક્ષમાવન્તો નિરાકારાઃ કાષ્ઠેઽગ્નિરિવ શેરતે ॥ ૫૮॥

લતા ધર્મા ત્વં સપુત્રઃ શાલાઃ પાણ્ડુસુતા મતાઃ ।
ન લતા વર્ધતે જાતુ મહાદ્રુમમનાશ્રિતા ॥ ૫૯॥

વનં રાજંસ્ત્વં સપુત્રોઽમ્બિકેય
સિંહાન્વને પાણ્ડવાંસ્તાત વિદ્ધિ ।

સિંહૈર્વિહીનં હિ વનં વિનશ્યેત્
સિંહા વિનશ્યેયુરૃતે વનેન ॥ ૬૦॥

॥ ઇતિ શ્રીમહાભારતે ઉદ્યોગપર્વણિ પ્રજાગરપર્વણિ
વિદુરવાક્યે સપ્તત્રિંશોઽધ્યાયઃ ॥ ૩૭॥

અધ્યાયઃ ૩૮

વિદુર ઉવાચ ।
ઊર્ધ્વં પ્રાણા હ્યુત્ક્રામન્તિ યૂનઃ સ્થવિર આયતિ ।
પ્રત્યુત્થાનાભિવાદાભ્યાં પુનસ્તાન્પતિપદ્યતે ॥ ૧॥

પીઠં દત્ત્વા સાધવેઽભ્યાગતાય
આનીયાપઃ પરિનિર્ણિજ્ય પાદૌ ।
સુખં પૃષ્ટ્વા પ્રતિવેદ્યાત્મ સંસ્થં
તતો દદ્યાદન્નમવેક્ષ્ય ધીરઃ ॥ ૨॥

યસ્યોદકં મધુપર્કં ચ ગાં ચ
ન મન્ત્રવિત્પ્રતિગૃહ્ણાતિ ગેહે ।
લોભાદ્ભયાદર્થકાર્પણ્યતો વા
તસ્યાનર્થં જીવિતમાહુરાર્યાઃ ॥ ૩॥

ચિકિત્સકઃ શક્ય કર્તાવકીર્ણી
સ્તેનઃ ક્રૂરો મદ્યપો ભ્રૂણહા ચ ।
સેનાજીવી શ્રુતિવિક્રાયકશ્ ચ
ભૃશં પ્રિયોઽપ્યતિથિર્નોદકાર્હઃ ॥ ૪॥

અવિક્રેયં લવણં પક્વમન્નં દધિ
ક્ષીરં મધુ તૈલં ઘૃતં ચ ।
તિલા માંસં મૂલફલાનિ શાકં
રક્તં વાસઃ સર્વગન્ધા ગુડશ્ ચ ॥ ૫॥

અરોષણો યઃ સમલોષ્ટ કાઞ્ચનઃ
પ્રહીણ શોકો ગતસન્ધિ વિગ્રહઃ ।
નિન્દા પ્રશંસોપરતઃ પ્રિયાપ્રિયે
ચરન્નુદાસીનવદેષ ભિક્ષુકઃ ॥ ૬॥

નીવાર મૂલેઙ્ગુદ શાકવૃત્તિઃ
સુસંયતાત્માગ્નિકાર્યેષ્વચોદ્યઃ ।
વને વસન્નતિથિષ્વપ્રમત્તો
ધુરન્ધરઃ પુણ્યકૃદેષ તાપસઃ ॥ ૭॥

અપકૃત્વા બુદ્ધિમતો દૂરસ્થોઽસ્મીતિ નાશ્વસેત્ ।
દીર્ઘૌ બુદ્ધિમતો બાહૂ યાભ્યાં હિંસતિ હિંસિતઃ ॥ ૮॥

ન વિશ્વસેદવિશ્વસ્તે વિશ્વસ્તે નાતિવિશ્વસેત્ ।
વિશ્વાસાદ્ભયમુત્પન્નં મૂલાન્યપિ નિકૃન્તતિ ॥ ૯॥

અનીર્ષ્યુર્ગુપ્તદારઃ સ્યાત્સંવિભાગી પ્રિયંવદઃ ।
શ્લક્ષ્ણો મધુરવાક્સ્ત્રીણાં ન ચાસાં વશગો ભવેત્ ॥ ૧૦॥

પૂજનીયા મહાભાગાઃ પુણ્યાશ્ચ ગૃહદીપ્તયઃ ।
સ્ત્રિયઃ શ્રિયો ગૃહસ્યોક્તાસ્તસ્માદ્રક્ષ્યા વિશેષતઃ ॥ ૧૧॥

પિતુરન્તઃપુરં દદ્યાન્માતુર્દદ્યાન્મહાનસમ્ ।
ગોષુ ચાત્મસમં દદ્યાત્સ્વયમેવ કૃષિં વ્રજેત્ ।
ભૃત્યૈર્વણિજ્યાચારં ચ પુત્રૈઃ સેવેત બ્રાહ્મણાન્ ॥ ૧૨॥

અદ્ભ્યોઽગ્નિર્બ્રહ્મતઃ ક્ષત્રમશ્મનો લોહમુત્થિતમ્ ।
તેષાં સર્વત્રગં તેજઃ સ્વાસુ યોનિષુ શામ્યતિ ॥ ૧૩॥

નિત્યં સન્તઃ કુલે જાતાઃ પાવકોપમ તેજસઃ ।
ક્ષમાવન્તો નિરાકારાઃ કાષ્ઠેઽગ્નિરિવ શેરતે ॥ ૧૪॥

યસ્ય મન્ત્રં ન જાનન્તિ બાહ્યાશ્ચાભ્યન્તરાશ્ ચ યે ।
સ રાજા સર્વતશ્ચક્ષુશ્ચિરમૈશ્વર્યમશ્નુતે ॥ ૧૫॥

કરિષ્યન્ન પ્રભાષેત કૃતાન્યેવ ચ દર્શયેત્ ।
ધર્મકામાર્થ કાર્યાણિ તથા મન્ત્રો ન ભિદ્યતે ॥ ૧૬॥

ગિરિપૃષ્ઠમુપારુહ્ય પ્રાસાદં વા રહોગતઃ ।
અરણ્યે નિઃશલાકે વા તત્ર મન્ત્રો વિધીયતે ॥ ૧૭॥

નાસુહૃત્પરમં મન્ત્રં ભારતાર્હતિ વેદિતુમ્ ।
અપણ્ડિતો વાપિ સુહૃત્પણ્ડિતો વાપ્યનાત્મવાન્ ।
અમાત્યે હ્યર્થલિપ્સા ચ મન્ત્રરક્ષણમેવ ચ ॥ ૧૮॥

કૃતાનિ સર્વકાર્યાણિ યસ્ય વા પાર્ષદા વિદુઃ ।
ગૂઢમન્ત્રસ્ય નૃપતેસ્તસ્ય સિદ્ધિરસંશયમ્ ॥ ૧૯॥

અપ્રશસ્તાનિ કર્માણિ યો મોહાદનુતિષ્ઠતિ ।
સ તેષાં વિપરિભ્રંશે ભ્રશ્યતે જીવિતાદપિ ॥ ૨૦॥

કર્મણાં તુ પ્રશસ્તાનામનુષ્ઠાનં સુખાવહમ્ ।
તેષામેવાનનુષ્ઠાનં પશ્ચાત્તાપકરં મહત્ ॥ ૨૧॥

સ્થાનવૃદ્ધ ક્ષયજ્ઞસ્ય ષાડ્ગુણ્ય વિદિતાત્મનઃ ।
અનવજ્ઞાત શીલસ્ય સ્વાધીના પૃથિવી નૃપ ॥ ૨૨॥

અમોઘક્રોધહર્ષસ્ય સ્વયં કૃત્યાન્વવેક્ષિણઃ ।
આત્મપ્રત્યય કોશસ્ય વસુધેયં વસુન્ધરા ॥ ૨૩॥

નામમાત્રેણ તુષ્યેત છત્રેણ ચ મહીપતિઃ ।
ભૃત્યેભ્યો વિસૃજેદર્થાન્નૈકઃ સર્વહરો ભવેત્ ॥ ૨૪॥

બ્રાહ્મણો બ્રાહ્મણં વેદ ભર્તા વેદ સ્ત્રિયં તથા ।
અમાત્યં નૃપતિર્વેદ રાજા રાજાનમેવ ચ ॥ ૨૫॥

ન શત્રુરઙ્કુમાપન્નો મોક્તવ્યો વધ્યતાં ગતઃ ।
અહતાદ્ધિ ભયં તસ્માજ્જાયતે નચિરાદિવ ॥ ૨૬॥

દૈવતેષુ ચ યત્નેન રાજસુ બ્રાહ્મણેષુ ચ ।
નિયન્તવ્યઃ સદા ક્રોધો વૃદ્ધબાલાતુરેષુ ચ ॥ ૨૭॥

નિરર્થં કલહં પ્રાજ્ઞો વર્જયેન્મૂઢ સેવિતમ્ ।
કીર્તિં ચ લભતે લોકે ન ચાનર્થેન યુજ્યતે ॥ ૨૮॥

પ્રસાદો નિષ્ફલો યસ્ય ક્રોધશ્ચાપિ નિરર્થકઃ ।
ન તં ભર્તારમિચ્છન્તિ ષણ્ઢં પતિમિવ સ્ત્રિયઃ ॥ ૨૯॥

ન બુદ્ધિર્ધનલાભાય ન જાડ્યમસમૃદ્ધયે ।
લોકપર્યાય વૃત્તાન્તં પ્રાજ્ઞો જાનાતિ નેતરઃ ॥ ૩૦॥

વિદ્યા શીલવયોવૃદ્ધાન્બુદ્ધિવૃદ્ધાંશ્ચ ભારત ।
ધનાભિજન વૃદ્ધાંશ્ચ નિત્યં મૂઢોઽવમન્યતે ॥ ૩૧॥

અનાર્ય વૃત્તમપ્રાજ્ઞમસૂયકમધાર્મિકમ્ ।
અનર્થાઃ ક્ષિપ્રમાયાન્તિ વાગ્દુષ્ટં ક્રોધનં તથા ॥ ૩૨॥

અવિસંવાદનં દાનં સમયસ્યાવ્યતિક્રમઃ ।
આવર્તયન્તિ ભૂતાનિ સમ્યક્પ્રણિહિતા ચ વાક્ ॥ ૩૩॥

અવિસંવાદકો દક્ષઃ કૃતજ્ઞો મતિમાનૃજુઃ ।
અપિ સઙ્ક્ષીણ કોશોઽપિ લભતે પરિવારણમ્ ॥ ૩૪॥

ધૃતિઃ શમો દમઃ શૌચં કારુણ્યં વાગનિષ્ઠુરા ।
મિત્રાણાં ચાનભિદ્રોહઃ સતૈતાઃ સમિધઃ શ્રિયઃ ॥ ૩૫॥

અસંવિભાગી દુષ્ટાત્મા કૃતઘ્નો નિરપત્રપઃ ।
તાદૃઙ્નરાધમો લોકે વર્જનીયો નરાધિપ ॥ ૩૬॥

ન સ રાત્રૌ સુખં શેતે સ સર્પ ઇવ વેશ્મનિ ।
યઃ કોપયતિ નિર્દોષં સ દોષોઽભ્યન્તરં જનમ્ ॥ ૩૭॥

યેષુ દુષ્ટેષુ દોષઃ સ્યાદ્યોગક્ષેમસ્ય ભારત ।
સદા પ્રસાદનં તેષાં દેવતાનામિવાચરેત્ ॥ ૩૮॥

યેઽર્થાઃ સ્ત્રીષુ સમાસક્તાઃ પ્રથમોત્પતિતેષુ ચ ।
યે ચાનાર્ય સમાસક્તાઃ સર્વે તે સંશયં ગતાઃ ॥ ૩૯॥

યત્ર સ્ત્રી યત્ર કિતવો યત્ર બાલોઽનુશાસ્તિ ચ ।
મજ્જન્તિ તેઽવશા દેશા નદ્યામશ્મપ્લવા ઇવ ॥ ૪૦॥

પ્રયોજનેષુ યે સક્તા ન વિશેષેષુ ભારત ।
તાનહં પણ્ડિતાન્મન્યે વિશેષા હિ પ્રસઙ્ગિનઃ ॥ ૪૧॥

યં પ્રશંસન્તિ કિતવા યં પ્રશંસન્તિ ચારણાઃ ।
યં પ્રશંસન્તિ બન્ધક્યો ન સ જીવતિ માનવઃ ॥ ૪૨॥

હિત્વા તાન્પરમેષ્વાસાન્પાણ્ડવાનમિતૌજસઃ ।
આહિતં ભારતૈશ્વર્યં ત્વયા દુર્યોધને મહત્ ॥ ૪૩॥

તં દ્રક્ષ્યસિ પરિભ્રષ્ટં તસ્માત્ત્વં નચિરાદિવ ।
ઐશ્વર્યમદસમ્મૂઢં બલિં લોકત્રયાદિવ ॥ ૪૪॥

॥ ઇતિ શ્રીમહાભારતે ઉદ્યોગપર્વણિ પ્રજાગરપર્વણિ
વિદુરવાક્યે અષ્ટત્રિંશોઽધ્યાયઃ ॥ ૩૮॥

અધ્યાયઃ ૩૯

ધૃતરાષ્ટ્ર ઉવાચ ।
અનીશ્વરોઽયં પુરુષો ભવાભવે
સૂત્રપ્રોતા દારુમયીવ યોષા ।
ધાત્રા હિ દિષ્ટસ્ય વશે કિલાયં
તસ્માદ્વદ ત્વં શ્રવણે ધૃતોઽહમ્ ॥ ૧॥

વિદુર ઉવાચ ।
અપ્રાપ્તકાલં વચનં બૃહસ્પતિરપિ બ્રુવન્ ।
લભતે બુદ્ધ્યવજ્ઞાનમવમાનં ચ ભારત ॥ ૨॥

પ્રિયો ભવતિ દાનેન પ્રિયવાદેન ચાપરઃ ।
મન્ત્રં મૂલબલેનાન્યો યઃ પ્રિયઃ પ્રિય એવ સઃ ॥ ૩॥

દ્વેષ્યો ન સાધુર્ભવતિ ન મેધાવી ન પણ્ડિતઃ ।
પ્રિયે શુભાનિ કર્માણિ દ્વેષ્યે પાપાનિ ભારત ॥ ૪॥

ન સ ક્ષયો મહારાજ યઃ ક્ષયો વૃદ્ધિમાવહેત્ ।
ક્ષયઃ સ ત્વિહ મન્તવ્યો યં લબ્ધ્વા બહુ નાશયેત્ ॥ ૫॥

સમૃદ્ધા ગુણતઃ કે ચિદ્ભવન્તિ ધનતોઽપરે ।
ધનવૃદ્ધાન્ગુણૈર્હીનાન્ધૃતરાષ્ટ્ર વિવર્જયેત્ ॥ ૬॥

ધૃતરાષ્ટ્ર ઉવાચ ।
સર્વં ત્વમાયતી યુક્તં ભાષસે પ્રાજ્ઞસમ્મતમ્ ।
ન ચોત્સહે સુતં ત્યક્તું યતો ધર્મસ્તતો જયઃ ॥ ૭॥

વિદુર ઉવાચ ।
સ્વભાવગુણસમ્પન્નો ન જાતુ વિનયાન્વિતઃ ।
સુસૂક્ષ્મમપિ ભૂતાનામુપમર્દં પ્રયોક્ષ્યતે ॥ ૮॥

પરાપવાદ નિરતાઃ પરદુઃખોદયેષુ ચ ।
પરસ્પરવિરોધે ચ યતન્તે સતતોથિતાઃ ॥ ૯॥

સ દોષં દર્શનં યેષાં સંવાસે સુમહદ્ભયમ્ ।
અર્થાદાને મહાન્દોષઃ પ્રદાને ચ મહદ્ભયમ્ ॥ ૧૦॥

યે પાપા ઇતિ વિખ્યાતાઃ સંવાસે પરિગર્હિતાઃ ।

યુક્તાશ્ચાન્યૈર્મહાદોષૈર્યે નરાસ્તાન્વિવર્જયેત્ ॥ ૧૧॥

નિવર્તમાને સૌહાર્દે પ્રીતિર્નીચે પ્રણશ્યતિ ।
યા ચૈવ ફલનિર્વૃત્તિઃ સૌહૃદે ચૈવ યત્સુખમ્ ॥ ૧૨॥

યતતે ચાપવાદાય યત્નમારભતે ક્ષયે ।
અલ્પેઽપ્યપકૃતે મોહાન્ન શાન્તિમુપગચ્છતિ ॥ ૧૩॥

તાદૃશૈઃ સઙ્ગતં નીચૈર્નૃશંસૈરકૃતાત્મભિઃ ।
નિશામ્ય નિપુણં બુદ્ધ્યા વિદ્વાન્દૂરાદ્વિવર્જયેત્ ॥ ૧૪॥

યો જ્ઞાતિમનુગૃહ્ણાતિ દરિદ્રં દીનમાતુરમ્ ।
સપુત્રપશુભિર્વૃદ્ધિં યશશ્ચાવ્યયમશ્નુતે ॥ ૧૫॥

જ્ઞાતયો વર્ધનીયાસ્તૈર્ય ઇચ્છન્ત્યાત્મનઃ શુભમ્ ।
કુલવૃદ્ધિં ચ રાજેન્દ્ર તસ્માત્સાધુ સમાચર ॥ ૧૬॥

શ્રેયસા યોક્ષ્યસે રાજન્કુર્વાણો જ્ઞાતિસત્ક્રિયામ્ ।
વિગુણા હ્યપિ સંરક્ષ્યા જ્ઞાતયો ભરતર્ષભ ॥ ૧૭॥

કિં પુનર્ગુણવન્તસ્તે ત્વત્પ્રસાદાભિકાઙ્ક્ષિણઃ ।
પ્રસાદં કુરુ દીનાનાં પાણ્ડવાનાં વિશાં પતે ॥ ૧૮॥

દીયન્તાં ગ્રામકાઃ કે ચિત્તેષાં વૃત્ત્યર્થમીશ્વર ।
એવં લોકે યશઃપ્રાપ્તો ભવિષ્યત્સિ નરાધિપ ॥ ૧૯॥

વૃદ્ધેન હિ ત્વયા કાર્યં પુત્રાણાં તાત રક્ષણમ્ ।
મયા ચાપિ હિતં વાચ્યં વિદ્ધિ માં ત્વદ્ધિતૈષિણમ્ ॥ ૨૦॥

જ્ઞાતિભિર્વિગ્રહસ્તાત ન કર્તવ્યો ભવાર્થિના ।
સુખાનિ સહ ભોજ્યાનિ જ્ઞાતિભિર્ભરતર્ષભ ॥ ૨૧॥

સમ્ભોજનં સઙ્કથનં સમ્પ્રીતિશ્ ચ પરસ્પરમ્ ।
જ્ઞાતિભિઃ સહ કાર્યાણિ ન વિરોધઃ કથં ચન ॥ ૨૨॥

જ્ઞાતયસ્તારયન્તીહ જ્ઞાતયો મજ્જયન્તિ ચ ।
સુવૃત્તાસ્તારયન્તીહ દુર્વૃત્તા મજ્જયન્તિ ચ ॥ ૨૩॥

સુવૃત્તો ભવ રાજેન્દ્ર પાણ્ડવાન્પ્રતિ માનદ ।
અધર્ષણીયઃ શત્રૂણાં તૈર્વૃતસ્ત્વં ભવિષ્યસિ ॥ ૨૪॥

શ્રીમન્તં જ્ઞાતિમાસાદ્ય યો જ્ઞાતિરવસીદતિ ।
દિગ્ધહસ્તં મૃગ ઇવ સ એનસ્તસ્ય વિન્દતિ ॥ ૨૫॥

પશ્ચાદપિ નરશ્રેષ્ઠ તવ તાપો ભવિષ્યતિ ।
તાન્વા હતાન્સુતાન્વાપિ શ્રુત્વા તદનુચિન્તય ॥ ૨૬॥

યેન ખટ્વાં સમારૂઢઃ પરિતપ્યેત કર્મણા ।
આદાવેવ ન તત્કુર્યાદધ્રુવે જીવિતે સતિ ॥ ૨૭॥

ન કશ્ચિન્નાપનયતે પુમાનન્યત્ર ભાર્ગવાત્ ।
શેષસમ્પ્રતિપત્તિસ્તુ બુદ્ધિમત્સ્વેવ તિષ્ઠતિ ॥ ૨૮॥

દુર્યોધનેન યદ્યેતત્પાપં તેષુ પુરા કૃતમ્ ।
ત્વયા તત્કુલવૃદ્ધેન પ્રત્યાનેયં નરેશ્વર ॥ ૨૯॥

તાંસ્ત્વં પદે પ્રતિષ્ઠાપ્ય લોકે વિગતકલ્મષઃ ।
ભવિષ્યસિ નરશ્રેષ્ઠ પૂજનીયો મનીષિણામ્ ॥ ૩૦॥

સુવ્યાહૃતાનિ ધીરાણાં ફલતઃ પ્રવિચિન્ત્ય યઃ ।
અધ્યવસ્યતિ કાર્યેષુ ચિરં યશસિ તિષ્ઠતિ ॥ ૩૧॥

અવૃત્તિં વિનયો હન્તિ હન્ત્યનર્થં પરાક્રમઃ ।
હન્તિ નિત્યં ક્ષમા ક્રોધમાચારો હન્ત્યલક્ષણમ્ ॥ ૩૨॥

પરિચ્છદેન ક્ષત્રેણ વેશ્મના પરિચર્યયા ।
પરીક્ષેત કુલં રાજન્ભોજનાચ્છાદનેન ચ ॥ ૩૩॥

યયોશ્ચિત્તેન વા ચિત્તં નૈભૃતં નૈભૃતેન વા ।
સમેતિ પ્રજ્ઞયા પ્રજ્ઞા તયોર્મૈત્રી ન જીર્યતે ॥ ૩૪॥

દુર્બુદ્ધિમકૃતપ્રજ્ઞં છન્નં કૂપં તૃણૈરિવ ।
વિવર્જયીત મેધાવી તસ્મિન્મૈત્રી પ્રણશ્યતિ ॥ ૩૫॥

અવલિપ્તેષુ મૂર્ખેષુ રૌદ્રસાહસિકેષુ ચ ।
તથૈવાપેત ધર્મેષુ ન મૈત્રીમાચરેદ્બુધઃ ॥ ૩૬॥

કૃતજ્ઞં ધાર્મિકં સત્યમક્ષુદ્રં દૃઢભક્તિકમ્ ।
જિતેન્દ્રિયં સ્થિતં સ્થિત્યાં મિત્રમત્યાગિ ચેષ્યતે ॥ ૩૭॥

ઇન્દ્રિયાણામનુત્સર્ગો મૃત્યુના ન વિશિષ્યતે ।
અત્યર્થં પુનરુત્સર્ગઃ સાદયેદ્દૈવતાન્યપિ ॥ ૩૮॥

માર્દવં સર્વભૂતાનામનસૂયા ક્ષમા ધૃતિઃ ।
આયુષ્યાણિ બુધાઃ પ્રાહુર્મિત્રાણાં ચાવિમાનના ॥ ૩૯॥

અપનીતં સુનીતેન યોઽર્થં પ્રત્યાનિનીષતે ।
મતિમાસ્થાય સુદૃઢાં તદકાપુરુષ વ્રતમ્ ॥ ૪૦॥

આયત્યાં પ્રતિકારજ્ઞસ્તદાત્વે દૃઢનિશ્ચયઃ ।
અતીતે કાર્યશેષજ્ઞો નરોઽર્થૈર્ન પ્રહીયતે ॥ ૪૧॥

કર્મણા મનસા વાચા યદભીક્ષ્ણં નિષેવતે ।
તદેવાપહરત્યેનં તસ્માત્કલ્યાણમાચરેત્ ॥ ૪૨॥

મઙ્ગલાલમ્ભનં યોગઃ શ્રુતમુત્થાનમાર્જવમ્ ।
ભૂતિમેતાનિ કુર્વન્તિ સતાં ચાભીક્ષ્ણ દર્શનમ્ ॥ ૪૩॥

અનિર્વેદઃ શ્રિયો મૂલં દુઃખનાશે સુખસ્ય ચ ।
મહાન્ભવત્યનિર્વિણ્ણઃ સુખં ચાત્યન્તમશ્નુતે ॥ ૪૪॥

નાતઃ શ્રીમત્તરં કિં ચિદન્યત્પથ્યતમં તથા ।
પ્રભ વિષ્ણોર્યથા તાત ક્ષમા સર્વત્ર સર્વદા ॥ ૪૫॥

ક્ષમેદશક્તઃ સર્વસ્ય શક્તિમાન્ધર્મકારણાત્ ।
અર્થાનર્થૌ સમૌ યસ્ય તસ્ય નિત્યં ક્ષમા હિતા ॥ ૪૬॥

યત્સુખં સેવમાનોઽપિ ધર્માર્થાભ્યાં ન હીયતે ।
કામં તદુપસેવેત ન મૂઢ વ્રતમાચરેત્ ॥ ૪૭॥

દુઃખાર્તેષુ પ્રમત્તેષુ નાસ્તિકેષ્વલસેષુ ચ ।
ન શ્રીર્વસત્યદાન્તેષુ યે ચોત્સાહ વિવર્જિતાઃ ॥ ૪૮॥

આર્જવેન નરં યુક્તમાર્જવાત્સવ્યપત્રપમ્ ।
અશક્તિમન્તં મન્યન્તો ધર્ષયન્તિ કુબુદ્ધયઃ ॥ ૪૯॥

અત્યાર્યમતિદાતારમતિશૂરમતિવ્રતમ્ ।
પ્રજ્ઞાભિમાનિનં ચૈવ શ્રીર્ભયાન્નોપસર્પતિ ॥ ૫૦॥

અગ્નિહોત્રફલા વેદાઃ શીલવૃત્તફલં શ્રુતમ્ ।
રતિપુત્ર ફલા દારા દત્તભુક્ત ફલં ધનમ્ ॥ ૫૧॥

અધર્મોપાર્જિતૈરર્થૈર્યઃ કરોત્યૌર્ધ્વ દેહિકમ્ ।

ન સ તસ્ય ફલં પ્રેત્ય ભુઙ્ક્તેઽર્થસ્ય દુરાગમાત્ ॥ ૫૨॥

કાનાર વનદુર્ગેષુ કૃચ્છ્રાસ્વાપત્સુ સમ્ભ્રમે ।
ઉદ્યતેષુ ચ શસ્ત્રેષુ નાસ્તિ શેષવતાં ભયમ્ ॥ ૫૩॥

ઉત્થાનં સંયમો દાક્ષ્યમપ્રમાદો ધૃતિઃ સ્મૃતિઃ ।
સમીક્ષ્ય ચ સમારમ્ભો વિદ્ધિ મૂલં ભવસ્ય તત્ ॥ ૫૪॥

તપોબલં તાપસાનાં બ્રહ્મ બ્રહ્મવિદાં બલમ્ ।
હિંસા બલમસાધૂનાં ક્ષમાગુણવતાં બલમ્ ॥ ૫૫॥

અષ્ટૌ તાન્યવ્રતઘ્નાનિ આપો મૂલં ફલં પયઃ ।
હવિર્બ્રાહ્મણ કામ્યા ચ ગુરોર્વચનમૌષધમ્ ॥ ૫૬॥

ન તત્પરસ્ય સન્દધ્યાત્પ્રતિકૂલં યદાત્મનઃ ।
સઙ્ગ્રહેણૈષ ધર્મઃ સ્યાત્કામાદન્યઃ પ્રવર્તતે ॥ ૫૭॥

અક્રોધેન જયેત્ક્રોધમસાધું સાધુના જયેત્ ।
જયેત્કદર્યં દાનેન જયેત્સત્યેન ચાનૃતમ્ ॥ ૫૮॥

સ્ત્રી ધૂર્તકેઽલસે ભીરૌ ચણ્ડે પુરુષમાનિનિ ।
ચૌરે કૃતઘ્ને વિશ્વાસો ન કાર્યો ન ચ નાસ્તિકે ॥ ૫૯॥

અભિવાદનશીલસ્ય નિત્યં વૃદ્ધોપસેવિનઃ ।
ચત્વારિ સમ્પ્રવર્ધન્તે કીર્તિરાયુર્યશોબલમ્ ॥ ૬૦॥

અતિક્લેશેન યેઽર્થાઃ સ્યુર્ધર્મસ્યાતિક્રમેણ ચ ।
અરેર્વા પ્રણિપાતેન મા સ્મ તેષુ મનઃ કૃથાઃ ॥ ૬૧॥

અવિદ્યઃ પુરુષઃ શોચ્યઃ શોચ્યં મિથુનમપ્રજમ્ ।
નિરાહારાઃ પ્રજાઃ શોચ્યાઃ શોચ્યં રાષ્ટ્રમરાજકમ્ ॥ ૬૨॥

અધ્વા જરા દેહવતાં પર્વતાનાં જલં જરા ।
અસમ્ભોગો જરા સ્ત્રીણાં વાક્શલ્યં મનસો જરા ॥ ૬૩॥

અનામ્નાય મલા વેદા બ્રાહ્મણસ્યાવ્રતં મલમ્ ।
કૌતૂહલમલા સાધ્વી વિપ્રવાસ મલાઃ સ્ત્રિયઃ ॥ ૬૪॥

સુવર્ણસ્ય મલં રૂપ્યં રૂપ્યસ્યાપિ મલં ત્રપુ ।
જ્ઞેયં ત્રપુ મલં સીસં સીસસ્યાપિ મલં મલમ્ ॥ ૬૫॥

ન સ્વપ્નેન જયેન્નિદ્રાં ન કામેન સ્ત્રિયં જયેત્ ।
નેન્ધનેન જયેદગ્નિં ન પાનેન સુરાં જયેત્ ॥ ૬૬॥

યસ્ય દાનજિતં મિત્રમમિત્રા યુધિ નિર્જિતાઃ ।
અન્નપાનજિતા દારાઃ સફલં તસ્ય જીવિતમ્ ॥ ૬૭॥

સહસ્રિણોઽપિ જીવન્તિ જીવન્તિ શતિનસ્તથા ।
ધૃતરાષ્ટ્ર વિમુઞ્ચેચ્છાં ન કથં ચિન્ન જીવ્યતે ॥ ૬૮॥

યત્પૃથિવ્યાં વ્રીહિ યવં હિરણ્યં પશવઃ સ્ત્રિયઃ ।
નાલમેકસ્ય તત્સર્વમિતિ પશ્યન્ન મુહ્યતિ ॥ ૬૯॥

રાજન્ભૂયો બ્રવીમિ ત્વાં પુત્રેષુ સમમાચર ।
સમતા યદિ તે રાજન્સ્વેષુ પાણ્ડુસુતેષુ ચ ॥ ૭૦॥

॥ ઇતિ શ્રીમહાભારતે ઉદ્યોગપર્વણિ પ્રજાગરપર્વણિ
વિદુરવાક્યે એકોનચત્વારિંશોઽધ્યાયઃ ॥ ૩૯॥

અધ્યાયઃ ૪૦

વિદુર ઉવાચ ।
યોઽભ્યર્થિતઃ સદ્ભિરસજ્જમાનઃ
કરોત્યર્થં શક્તિમહાપયિત્વા ।
ક્ષિપ્રં યશસ્તં સમુપૈતિ સન્તમલં
પ્રસન્ના હિ સુખાય સન્તઃ ॥ ૧॥

મહાન્તમપ્યર્થમધર્મયુક્તં
યઃ સન્ત્યજત્યનુપાકુષ્ટ એવ ।
સુખં સ દુઃખાન્યવમુચ્ય શેતે
જીર્ણાં ત્વચં સર્પ ઇવાવમુચ્ય ॥ ૨॥

અનૃતં ચ સમુત્કર્ષે રાજગામિ ચ પૈશુનમ્ ।
ગુરોશ્ચાલીક નિર્બન્ધઃ સમાનિ બ્રહ્મહત્યયા ॥ ૩॥

અસૂયૈક પદં મૃત્યુરતિવાદઃ શ્રિયો વધઃ ।
અશુશ્રૂષા ત્વરા શ્લાઘા વિદ્યાયાઃ શત્રવસ્ત્રયઃ ॥ ૪॥

સુખાર્થિનઃ કુતો વિદ્યા નાસ્તિ વિદ્યાર્થિનઃ સુખમ્ ।

સુખાર્થી વા ત્યજેદ્વિદ્યાં વિદ્યાર્થી વા સુખં ત્યજેત્ ॥ ૫॥

નાગ્નિસ્તૃપ્યતિ કાષ્ઠાનાં નાપગાનાં મહોદધિઃ ।
નાન્તકઃ સર્વભૂતાનાં ન પુંસાં વામલોચના ॥ ૬॥

આશા ધૃતિં હન્તિ સમૃદ્ધિમન્તકઃ
ક્રોધઃ શ્રિયં હન્તિ યશઃ કદર્યતા ।
અપાલનં હન્તિ પશૂંશ્ચ રાજન્
એકઃ ક્રુદ્ધો બ્રાહ્મણો હન્તિ રાષ્ટ્રમ્ ॥ ૭॥

અજશ્ચ કાંસ્યં ચ રથશ્ચ નિત્યં
મધ્વાકર્ષઃ શકુનિઃ શ્રોત્રિયશ્ ચ ।
વૃદ્ધો જ્ઞાતિરવસન્નો વયસ્ય
એતાનિ તે સન્તુ ગૃહે સદૈવ ॥ ૮॥

અજોક્ષા ચન્દનં વીણા આદર્શો મધુસર્પિષી ।
વિષમૌદુમ્બરં શઙ્ખઃ સ્વર્ણં નાભિશ્ચ રોચના ॥ ૯॥

ગૃહે સ્થાપયિતવ્યાનિ ધન્યાનિ મનુરબ્રવીત્ ।
દેવ બ્રાહ્મણ પૂજાર્થમતિથીનાં ચ ભારત ॥ ૧૦॥

ઇદં ચ ત્વાં સર્વપરં બ્રવીમિ
પુણ્યં પદં તાત મહાવિશિષ્ટમ્ ।
ન જાતુ કામાન્ન ભયાન્ન લોભાદ્
ધર્મં ત્યજેજ્જીવિતસ્યાપિ હેતોઃ ॥ ૧૧॥

નિત્યો ધર્મઃ સુખદુઃખે ત્વનિત્યે
નિત્યો જીવો ધાતુરસ્ય ત્વનિત્યઃ ।
ત્યક્ત્વાનિત્યં પ્રતિતિષ્ઠસ્વ નિત્યે
સન્તુષ્ય ત્વં તોષ પરો હિ લાભઃ ॥ ૧૨॥

મહાબલાન્પશ્ય મનાનુભાવાન્
પ્રશાસ્ય ભૂમિં ધનધાન્ય પૂર્ણામ્ ।
રાજ્યાનિ હિત્વા વિપુલાંશ્ચ ભોગાન્
ગતાન્નરેન્દ્રાન્વશમન્તકસ્ય ॥ ૧૩॥

મૃતં પુત્રં દુઃખપુષ્ટં મનુષ્યા
ઉત્ક્ષિપ્ય રાજન્સ્વગૃહાન્નિર્હરન્તિ ।

તં મુક્તકેશાઃ કરુણં રુદન્તશ્
ચિતામધ્યે કાષ્ઠમિવ ક્ષિપન્તિ ॥ ૧૪॥

અન્યો ધનં પ્રેતગતસ્ય ભુઙ્ક્તે
વયાંસિ ચાગ્નિશ્ચ શરીરધાતૂન્ ।
દ્વાભ્યામયં સહ ગચ્છત્યમુત્ર
પુણ્યેન પાપેન ચ વેષ્ટ્યમાનઃ ॥ ૧૫॥

ઉત્સૃજ્ય વિનિવર્તન્તે જ્ઞાતયઃ સુહૃદઃ સુતાઃ ।
અગ્નૌ પ્રાસ્તં તુ પુરુષં કર્માન્વેતિ સ્વયં કૃતમ્ ॥ ૧૬॥

અસ્માલ્લોકાદૂર્ધ્વમમુષ્ય ચાધો
મહત્તમસ્તિષ્ઠતિ હ્યન્ધકારમ્ ।
તદ્વૈ મહામોહનમિન્દ્રિયાણાં
બુધ્યસ્વ મા ત્વાં પ્રલભેત રાજન્ ॥ ૧૭॥

ઇદં વચઃ શક્ષ્યસિ ચેદ્યથાવન્
નિશમ્ય સર્વં પ્રતિપત્તુમેવમ્ ।
યશઃ પરં પ્રાપ્સ્યસિ જીવલોકે
ભયં ન ચામુત્ર ન ચેહ તેઽસ્તિ ॥ ૧૮॥

આત્મા નદી ભારત પુણ્યતીર્થા
સત્યોદકા ધૃતિકૂલા દમોર્મિઃ ।
તસ્યાં સ્નાતઃ પૂયતે પુણ્યકર્મા
પુણ્યો હ્યાત્મા નિત્યમમ્ભોઽમ્ભ એવ ॥ ૧૯॥

કામક્રોધગ્રાહવતીં પઞ્ચેન્દ્રિય જલાં નદીમ્ ।
કૃત્વા ધૃતિમયીં નાવં જન્મ દુર્ગાણિ સન્તર ॥ ૨૦॥

પ્રજ્ઞા વૃદ્ધં ધર્મવૃદ્ધં સ્વબન્ધું
વિદ્યા વૃદ્ધં વયસા ચાપિ વૃદ્ધમ્ ।
કાર્યાકાર્યે પૂજયિત્વા પ્રસાદ્ય
યઃ સમ્પૃચ્છેન્ન સ મુહ્યેત્કદા ચિત્ ॥ ૨૧॥

ધૃત્યા શિશ્નોદરં રક્ષેત્પાણિપાદં ચ ચક્ષુષા ।
ચક્ષુઃ શ્રોત્રે ચ મનસા મનો વાચં ચ કર્મણા ॥ ૨૨॥

નિત્યોદકી નિત્યયજ્ઞોપવીતી

નિત્યસ્વાધ્યાયી પતિતાન્ન વર્જી ।
ઋતં બ્રુવન્ગુરવે કર્મ કુર્વન્
ન બ્રાહ્મણશ્ચ્યવતે બ્રહ્મલોકાત્ ॥ ૨૩॥

અધીત્ય વેદાન્પરિસંસ્તીર્ય ચાગ્નીન્
ઇષ્ટ્વા યજ્ઞૈઃ પાલયિત્વા પ્રજાશ્ ચ ।
ગોબ્રાહ્મણાર્થે શસ્ત્રપૂતાન્તરાત્મા
હતઃ સઙ્ગ્રામે ક્ષત્રિયઃ સ્વર્ગમેતિ ॥ ૨૪॥

વૈશ્યોઽધીત્ય બ્રાહ્મણાન્ક્ષત્રિયાંશ્ ચ
ધનૈઃ કાલે સંવિભજ્યાશ્રિતાંશ્ ચ ।
ત્રેતા પૂતં ધૂમમાઘ્રાય પુણ્યં
પ્રેત્ય સ્વર્ગે દેવ સુખાનિ ભુઙ્ક્તે ॥ ૨૫॥

બ્રહ્મક્ષત્રં વૈશ્ય વર્ણં ચ શૂદ્રઃ
ક્રમેણૈતાન્ન્યાયતઃ પૂજયાનઃ ।
તુષ્ટેષ્વેતેષ્વવ્યથો દગ્ધપાપસ્
ત્યક્ત્વા દેહં સ્વર્ગસુખાનિ ભુઙ્ક્તે ॥ ૨૬॥

ચાતુર્વર્ણ્યસ્યૈષ ધર્મસ્તવોક્તો
હેતું ચાત્ર બ્રુવતો મે નિબોધ ।
ક્ષાત્રાદ્ધર્માદ્ધીયતે પાણ્ડુપુત્રસ્
તં ત્વં રાજન્રાજધર્મે નિયુઙ્ક્ષ્વ ॥ ૨૭॥

ધૃતરાષ્ટ્ર ઉવાચ ।
એવમેતદ્યથા માં ત્વમનુશાસતિ નિત્યદા ।
મમાપિ ચ મતિઃ સૌમ્ય ભવત્યેવં યથાત્થ મામ્ ॥ ૨૮॥

સા તુ બુદ્ધિઃ કૃતાપ્યેવં પાણ્ડવાન્પ્રતિ મે સદા ।
દુર્યોધનં સમાસાદ્ય પુનર્વિપરિવર્તતે ॥ ૨૯॥

ન દિષ્ટમભ્યતિક્રાન્તું શક્યં મર્ત્યેન કેન ચિત્ ।
દિષ્ટમેવ કૃતં મન્યે પૌરુષં તુ નિરર્થકમ્ ॥ ૩૦॥

॥ ઇતિ શ્રીમાહાભારતે ઉદ્યોગપર્વણિ પ્રજાગરપર્વણિ
વિદુરવાક્યે ચત્વારિંશોઽધ્યાયઃ ॥ ૪૦॥

ઇતિ વિદુર નીતિ સમાપ્તા ॥

vidura nIti

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*